ओम्

# श्रीमद्भगवद्गीता

उपोद्घातभाष्यम्

स भगवान् सृष्ट्वा इदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम्। '

ततोऽन्यांश्च सनक-सनन्दनादीन् उत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञान-वैराग्य-लक्षणं ग्राहयामास।

द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्ति-लक्षणश्च। जगतः स्थितिकारणम्, प्राणिनां साक्षाद् अभ्युदय-निःश्रेयसहेतुः यः सः धर्मः ब्राह्मणाद्यैः वर्णिभिः आश्रमिभिश्च श्रेयोर्थिभिः अनुष्ठीयमानः।

दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवाद् हीयमान-विवेक-विज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे प्रवर्धमाने च अधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्त्ता नारायणाख्यः विष्णुः भौमस्य ब्रह्मणः ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवाद् अंशेन कृष्णः किल सम्बभूव।

ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद् वैदिको धर्मः तदधीनत्वाद् वर्णाश्रमभेदानाम्।

स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजः अव्ययः भूतानामीश्वरो नित्यशुद्धबुद्ध-मुक्तस्वभावः अपि सन् स्वमायया देहवान् इव जात इव च लोकानुग्रहं कुर्वन् इव लक्ष्यते।

स्वप्रयोजन-अभावेऽपि भूतानुजिघृक्षया वैदिकं हि धर्म-द्वयम् अर्जुनाय शोकमोहमहोदधौ निमग्नाय उपदिदेश, गुणाधिकैः हि गृहीतः अनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यति इति।

तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञः भगवान् गीताख्यैः सप्तभिः श्लोकशतैः उपनिबबन्ध।

तदिदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतं दुर्विज्ञेयार्थम्।

तदर्थ-आविष्करणाय अनेकैः विवृत-पदपदार्थवाक्यार्थ-न्यायमपि अत्यन्त-विरुद्धानेकार्थत्वेन लौकिकैः गृह्यमाणम् उपलभ्य अहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतः विवरणं करिष्यामि।

तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम्।

तच्च सर्व-कर्मसंन्यासपूर्वकाद् आत्मज्ञाननिष्ठारूपाद् धर्माद् भवति।

तथा इममेव गीतार्थं धर्ममुद्दिश्य भगवतैव उक्तं - “स हि धर्मः सुपयार्प्तः ब्रह्मणः पदवेदने” इति

अनुगीतासु (महाभारत. अश्व १६.१२)। किञ्च अन्यदपि तत्रैव उक्तम् “नैव धर्मी न चाधर्मी न चैव

हि शुभाशुभी” (महाभारत अश्व १९.०७)।

“यः स्यादेकासने लीनस्तूष्णीं किञ्चिदचिन्तयन्” (महाभारत अश्व १९.०१) “ज्ञानं संन्यासलक्षणम्”

(महाभारत अश्व ४३.२६) इति च।

इहापि च अन्ते उक्तम् अर्जुनाय सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति।

अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणः घर्मः वर्णाश्रमांश्च उद्दिश्य विहितः स देवादिस्थान-प्राप्ति-हेतुरपि

सन् ईश्वरार्पण-बुद्ध्या अनुष्ठीयमानः सत्वशुद्धये भवति फलाभिसन्धि-वर्जितः।

शुद्धसत्वस्य च ज्ञाननिष्ठा-योग्यता-प्राप्तिद्वारेण ज्ञानोत्पत्ति-हेतुत्वेन च निःश्रेयस-हेतुत्वमपि प्रतिपद्यते।

तथा च इममेव अर्थमभिसन्धाय वक्ष्यति "ब्रह्मण्याधाय कर्माणि" (गीता ५.१०) "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वा आत्मशुद्धये" (गीता ५.११) इति च।

इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनं परमार्थतत्वं च वासुदेवाख्यं परं ब्रह्म अभिधेयभूतं विशेषतः अभिव्यञ्जयद् विशिष्टप्रयोजनसम्बन्धाभिधेयवत् गीता-शास्त्रम्।

यतः तदर्थे विज्ञाते समस्तपुरुषार्थसिद्धिः अतः तद्विवरणे यत्नः क्रियते मया।

अध्यायः २

सञ्जय उवाच

तं तथा कृपयाऽविष्टमश्रुपूर्णाकुलेक्षणम्।

विषीदन्तमिदं वाक्यमुवाच मधुसूदनः।।2.1।।

मधुसूदनः तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम् विषीदन्तम् तं इदं वाक्यं उवाच ।। १

Sañjaya said:

To him who was sad and thus overwhelmed by compassion, whose eyes were filled with tears and showed distress, Kṛṣṇa spoke these words.

श्री भगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।

अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥2.2॥

श्री भगवानुवाच । अर्जुन कुतः त्वा इदं अनार्यजुष्टम् अस्वर्ग्यम् अकीर्त्तिकरम् कश्मलम् विषमे समुपस्थितम् ।। २

Śrī Bhagavān said:

In such crisis from where has this despair come upon you, Oh! Arjuna? It is not at all becoming of an upright man and does not add to your good name. Nor is it which leads one to heaven.

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।

क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप॥2.3॥

पार्थ परंतप क्लैब्यं मा अगमः स्म एतत् त्वयि न उपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ।। ३

Oh! Pārtha, the vanquisher of enemies, do not yield to unmanliness. This does not befit you. Give up this lowly weakness of heart and get up.

अर्जुन उवाच

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।

इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन॥2.4॥

मधुसूदन अरिसूदन कथं संख्ये अहं पूजार्हौ भीष्मम् द्रोणं च इषुभिः प्रतियोत्स्यामि ।। ४

Arjuna said:
Oh! Destroyer of foes! Oh! Destroyer of the demon, Madhu (Oh! Kṛṣṇa!) How will I in this battle fight with arrows against Bhīṣma and Droṇa, who are worthy of my worship?

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके।

हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्॥2.5॥

अर्थकामांस्तु भोगान् गुरून् हत्वा रुधिरप्रदिग्धान् इहैव भुञ्जीय । (अतः) महानुभावान् गुरूनहत्वा भैक्षम् भोक्तुं अपि इहलोके श्रेयः हि ।। ५

It would be better indeed to eat food collected from others here in this world than to kill these highly exalted teachers. Whereas, if I kill them, the enjoyments of security and pleasure I would experience in this world will be stained with blood.

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः।

यानेव हत्वा न जिजीविषाम- स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः।।2.6।।

कतरत् नः गरीयः (इति) एतद् न विद्मः । यद् जयेम वा यदि जयेयुः वा (इति) च ( एतद् अपि न विद्मः )।
यान् हत्वा एव न जिजीविषामः ते धार्तराष्ट्राः प्रमुखे अवस्थिताः । ६

And, we do not know which of the two will be better for us — that we should conquer them or that they should conquer us. The sons of Dhṛtarāṣṭra, after slaying whom we will indeed not want to live, stand facing us.

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।2.7।।

भूमौ असपत्नम् ऋद्धम् राज्यं अवाप्य सुराणामपि आधिपत्यम् च (अवाप्य) (स्थितस्य) मम इन्द्रियाणाम् उच्छोषणम् शोकम् यत् अपनुद्यात् (तत्) न प्रपश्यामि हि ।। ७

Overcome by faint-heartedness, confused about my duty, I ask you which is definitely better for me. Please tell me. I am your student. Please teach me, who has taken refuge in you.

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम्।

अवाप्य भूमावसपत्नमृद्धम् राज्यं सुराणामपि चाधिपत्यम्।।2.8।।

परन्तपः गुडाकेशः हृषीकेशं गोविन्दम् एवम् उक्त्वा न येत्स्ये इति (च) उक्त्वा तूष्णीं बभूव ह।। ८

I do not see anything that will remove the sorrow that dries up my senses, even if I were to obtain an unrivalled and prosperous kingdom on earth and sovereignty over the denizens of heaven.

सञ्जय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप।

न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।।2.9।।

भारत उभयोः सेनयोः मध्ये हृषीकेशः प्रहसन् इव तम् विषीदन्तम् इदं वचः उवाच ।। ९

Sañjaya said:

Having spoken to Hṛṣīkeśa (Lord Kṛṣṇa) in this manner, Guḍākeśa (Arjuna), the scorcher of foes, saying to Govinda, ‘I shall not fight,’ became silent.

तमुवाच हृषीकेशः प्रहसन्निव भारत।

सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः।।2.10।।

त्वं अशोच्यान् (प्रति) अन्वशोचः (असि)। (त्वं) प्रज्ञावादान् च भाषसे । पण्डिताः गतासून् अगतासून् च प्रति न अनुशोचन्ति ।। १०

Oh! Bhārata, to him who was sad in the midst of both armies, Hṛṣīkeśa (Kṛṣṇa), as though laughing, said these words.

अत्र च "दृष्ट्वा तु पाण्डवानीकम्" (गी १.२) इत्यारभ्य "न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह" (गी २.९) इत्येतदन्तः प्राणिनां शोक-मोहादि-संसार-बीज-भूत-दोष-उद्भव-कारण-प्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थः।

तथा हि अर्जुनेन राज्यगुरु-पुत्र-मित्र-सुहृत्-स्वजन-सम्बन्धि-बान्धवेषु अहमेषाम् मम एते इत्येवं भ्रान्ति-प्रत्यय-निमित्त-स्नेह-विच्छेदादि-निमित्तावात्मनः शोकमोहौ प्रदर्शितौ "कथं भीष्ममहं सङ्ख्ये" (गी २.४) इत्यादिना।

शोकमोहाभ्यां ह्यभिभूत-विवेक-विज्ञानः स्वत एव क्षात्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद् युद्धादुपरराम, परधर्मं च भिक्षा-जीवनादिकं कर्त्तुं प्रववृते।।

तथा च सर्वप्राणिनां शोक-मोहादि-दोषाविष्ट-चेतसां स्वभावत एव स्वधर्म-परित्यागः प्रतिषिद्ध-सेवा च स्यात्।

स्वधर्मे प्रवृत्तानामपि तेषां वाङ्-मनः-कायादीनां प्रवृत्तिः फलाभिसन्धिपूर्विकैव साहङ्कारा च भवति।

तत्रैवं सति धर्माधर्मोपचयाद् इष्टानिष्ट-जन्म-सुख-दुःख-संप्राप्ति-लक्षणः संसारोऽनुपरतो भवतीत्यतः संसार-बीज-भूतौ शोकमोहौ। तयोश्च सर्वकर्म-संन्यास-पूर्वकादात्मज्ञानान्नान्यतो निवृत्तिः इति तदुपदिदिक्षुः सर्वलोकानुग्रहार्थमर्जुनं निमित्तीकृत्य आह भगवान् वासुदेवः - अशोच्यान् इत्यादि।।

अत्र केचिदाहुः।

सर्वकर्म-संन्यास-पूर्वकादात्मज्ञान-निष्ठा-मात्रादेव केवलात् कैवल्यं न प्राप्यत एव। किं तर्हि -

अग्निहोत्रादि-श्रौत-स्मार्त्त-कर्म-सहिताद् ज्ञानात् कैवल्य-प्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थ इति। ज्ञापकं चाऽऽहुरस्यार्थस्य "अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि"(गी २.३३), "कर्मण्येवाधिकारस्ते" (गी २.४७), "कुरु कर्मैव तस्मात्त्वम्" (गी ४.१५) इत्यादि। हिंसादि-युक्तत्वाद् वैदिकं कर्माधर्मायेतीयमप्याशङ्का न कार्या। कथम्? क्षात्रं कर्म युद्धलक्षणं गुरु-भ्रातृ-पुत्रादि-हिंसा-लक्षणमत्यन्त-क्रूरमपि स्वधर्म इति कृत्वा नाधर्माय, तदकरणे च "ततः स्वधर्मं कीर्त्तिं च हित्वा पापम् अवाप्स्यसि" (गी २.३३) इति ब्रुवता यावज्जीवादि-श्रुति-चोदितानां स्वकर्मणां पश्वादि-हिंसा-लक्षणानां च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवतीति।।

तदसत्। ज्ञान-कर्म-निष्ठयोर्विभाग-वचनाद् बुद्धि-द्वय-आश्रययोः।

"अशोच्यान्..." (गी २.११) इत्यादिना भगवता यावत् "स्वधर्ममपि चावेक्ष्य..." (गी २.३१)

इत्येतदन्तेन ग्रन्थेन यत्परमार्थात्म-तत्त्व-निरूपणं कृतं तत्साङ्ख्यम्।

तद्विषया बुद्धिरात्मनो जन्मादि-षड्विक्रिया-अभावाद् अकर्त्तात्मेति प्रकरणार्थ-निरूपणाद्या जायते सा सांख्य-बुद्धिः। सा येषां ज्ञानिनामुचिता भवति ते सांख्याः।।

एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादि-व्यतिरिक्तत्व-कर्त्तृत्व-भोक्तृत्वाद्यपेक्षो धर्माधर्म-विवेक-पूर्वको मोक्ष-साधनानुष्ठान-निरूपण-लक्षणो योगः।

तद्विषया बुद्धिर्योग-बुद्धिः। सा येषां कर्मिणामुचिता भवति ते योगिनः।।

तथा च भगवता विभक्ते द्वे बुद्धी निर्दिष्टे "एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां श‍ृणु" (गी २.३९) इति।

तयोश्च साङ्ख्य-बुद्ध्याश्रयां ज्ञानयोगेननिष्ठां साङ्ख्यानां विभक्तां वक्ष्यति "पुरा वेदात्मना मया प्रोक्ता" इति। तथा च योग-बुद्ध्याश्रयां कर्मयोगेन निष्ठां विभक्तां च वक्ष्यति "कर्मयोगेन योगिनाम्" (गी ३.३) इति।

एवं साङ्ख्य-बुद्धिं योग-बुद्धिं चाश्रित्य द्वे निष्ठे विभक्ते भगवतोक्ते ज्ञान-कर्मणोः कर्तृत्वाकर्तृत्वैकत्वानेकत्व-बुद्ध्याश्रययोः एक-पुरुषाश्रयत्वासम्भवं पश्यता।

यथैतद् विभागवचनं तथैव दर्शितं शातपथीये ब्राह्मणे "एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्ति" इति सर्वकर्मसंन्यासं विधाय तच्छेषेण "किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः" (बृ. ४.४.२२) इति।

तत्रैव (बृ १.४.१७) च "प्राग्दारपरिग्रहात् पुरुष आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनं पुत्रं द्विप्रकारं च वित्तं मानुषं दैवं च, तत्र मानुषं वित्तं कर्मरूपं पितृलोक-प्राप्ति-साधनं, विद्यां च दैवं

वित्तं देवलोक-प्राप्ति-साधनं, सोऽकामयत" इत्यविद्याकामवत एव सर्वाणि कर्माणि श्रौतादीनि दर्शितानि। "तेभ्यो व्युत्थाय प्रव्रजन्ति" इति व्युत्थानमात्मानमेव लोकमिच्छतोऽकामस्य विहितम्। तदेतद् विभाग-वचनमनुपपन्नं स्याद्यदि श्रौतकर्म-ज्ञानयोः समुच्चयोऽभिप्रेतः स्याद्भगवतः।।

न चार्जुनस्य प्रश्न उपपन्नो भवति "ज्यायसी चेत् कर्मणस्ते" (गी.३.१) इत्यादिः।

एकपुरुषानुष्ठेयत्व-असम्भवं बुद्धि-कर्मणोर्भगवता पूर्वमनुक्तं कथम् अर्जुनोऽश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्वं भगवति अध्यारोपयेन्मृषैव "ज्यायसी चेत् कर्मणस्ते मता बुद्धिः" (गी ३.१) इति।

किञ्च यदि बुद्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यादर्जुनस्यापि स उक्त एवेति "यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्" (गी ५.१) इति कथम् उभयोः उपदेशे सति अन्यतरविषय एव प्रश्नः स्यात्।

न हि पित्त-प्रशमनार्थिनो वैद्येन मधुरं शीतं च भोक्तव्यमित्युपदिष्टे तयोरन्यतरत् पित्त-प्रशमन-कारणं ब्रूहीति प्रश्नः सम्भवति।।

अथ अर्जुनस्य भगवदुक्त-वचनार्थ-विवेकानवधारण-निमित्तः प्रश्नः कल्पयेत् तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयं मया बुद्धिकर्मणोः समुच्चय उक्तः, किमर्थमित्थं त्वं भ्रान्तोऽसि इति, न तु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव "द्वे निष्ठे मया पुरा प्रोक्ते" इति वक्तुं युक्तम्।।

नापि स्मार्त्तेनैव कर्मणा बुद्धेः समुच्चयेऽभिप्रेते विभाग-वचनादि सर्वमुपपन्नं स्यात्।

किञ्च क्षत्रियस्य युद्धं स्मार्त्तं कर्म स्वधर्ममिति जानतः "तत्किं कर्मणि घोरे मां नियोजयसि" (गी ३.१) इत्युपालम्भोऽनुपपन्नः।

तस्माद् गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्त्तेन वा कर्मणा आत्मज्ञानस्य समुच्चयो न केनचिद् दर्शयितुं शक्यः।।

यस्य त्वज्ञानाद्रागादि-दोषतो वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्ध-सत्त्वस्य ज्ञानमुत्पन्नं परमार्थ-तत्त्व-विषयम् एकमेवेदं सर्वं ब्रह्माकर्तृ च इति, तस्य कर्मणि कर्मप्रयोजने च निवृत्तेऽपि लोक-सङ्ग्रहार्थं यत्नपूर्वं यथा प्रवृत्तः तथैव कर्मणि प्रवृत्तस्य यत्प्रवृत्ति-रूपंदृश्यते न तत्कर्म, येन बुद्धेः समुच्चयः स्यात्। यथा भगवतो वासुदेवस्य क्षात्र-कर्म-चेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थ-सिद्धये तद्वत् तत्फलाभिसन्धि-अहङ्काराभावस्य तुल्यत्वाद् विदुषः।

तत्त्ववित्तु नाहं करोमि इति मन्यते, न च तत्फलमभिसन्धत्ते।

यथा च स्वर्गादि-कामार्थिनः अग्निहोत्रादि-कर्म-साधनानुष्ठानाय आहिताग्नेः काम्ये एवाग्निहोत्रादौ

प्रवृत्तस्य सामिकृते विनष्टेऽपि कामे तदेवाग्निहोत्राद्यनुष्ठितेऽपि न तत् काम्यमग्निहोत्रादि भवति।

तथा च दर्शयति भगवान् “कुर्वन्नपि” (गी ५.७), “न करोति न लिप्यते” (गी १३.३१) इति तत्र

तत्र।।

यच्च “पूर्वैः पूर्वतरं कृतम्” (गी ४.१५) “कर्मणैव हि संसिद्धिमास्थिता जनकादयः” (गी ३.२०)

इति, तत्तु प्रविभज्य विज्ञेयम्। तत्कथम्? यदि तावत् पूर्वे जनकादयः तत्त्वविदोऽपि प्रवृत्तकर्माणः

स्युः, ते लोकसङ्ग्रहार्थं “गुणा गुणेषु वर्त्तन्ते” (गी ३.२८) इति ज्ञानेनैव संसिद्धिमास्थिताः।

कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव संसिद्धिमास्थिताः, न कर्मसंन्यासं कृतवन्त इत्येषोऽर्थः।

अथ न ते तत्त्वविदः ईश्वर-समर्पितेन कर्मणा साधनभूतेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्ति-लक्षणां वा

संसिद्धिमास्थिता जनकादय इति व्याख्येयम्।

एतमेवार्थं वक्ष्यति भगवान् "सत्त्व-शुद्धये कर्म कुर्वन्ति" (गी ५.११) इति।

"स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" (गी १८.४६) इत्युक्त्वा सिद्धिं प्राप्तस्य च

पुनर्ज्ञाननिष्ठां वक्ष्यति "सिद्धिं प्राप्तो यथा ब्रह्म" (गी १८.५०) इत्यादिना।।

तस्माद् गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्मसमुच्चितादिति निश्चितोऽर्थः।

यथा चायमर्थः तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः।।

तत्रैवं धर्म-सम्मूढ-चेतसो महति शोकसागरे निमग्नस्य अर्जुनस्य अन्यत्रात्मज्ञानादुद्धरणमपश्यन्

भगवान् वासुदेवः ततः अर्जुनमुद्दिधारयिषुः आत्मज्ञानाय अवतारयन्नाह -

**श्रीभगवानुवाच।**

**अशोच्यान् अन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**

**गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।। ११**

अशोच्यान् अन्वशोचः त्वं प्रज्ञावादान् च भाषसे गतासून् अगतासून् च न अनुशोचन्ति पण्डिताः।। ११

Śrī Bhagavān said:
You grieve for those who should not be grieved for. Yet you speak words of wisdom. The wise do not grieve for those who are living or for those who are no longer living.

अशोच्यानित्यादि। न शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात्, परमार्थरूपेण च नित्यत्वात्, तान्

अशोच्यान् अन्वशोचः अनुशोचितवानसि ते म्रियन्ते मन्निमित्तम्, अहं तैर्विनाभूतः किं करिष्यामि

राज्य-सुखादिना इति।

त्वं प्रज्ञावादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे।

तदेतन्मौढ्यं पाण्डित्यं च विरुद्धमात्मनि दर्शयस्युन्मत्त इव इत्यभिप्रायः।

यस्माद् गतासून् गत-प्राणान् मृतान् अगतासून् अगत-प्राणान् जीवतः च नानुशोचन्ति पण्डिताः

आत्मज्ञाः।

पण्डाऽऽत्मविषया बुद्धिर्येषां ते हि पण्डिताः पाण्डित्यं निर्विद्य (बृ. ३.५.१) इति श्रुतेः।

परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढोऽसीत्यभिप्रायः।। ११ ।।

कुतस्ते अशोच्याः यतः नित्याः। कथम् -

**नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।**

**न चैव न भविष्यामः सर्वे वयमतः परम्।। १२**

अहम् जातु न तु आसम् (इति) न एव । त्वं (न आसीः इति) न । इमे जनाधिपाः (न आसन् इति) न । अतः परम् सर्वे वयम् न च भविष्यामः (इति) न एव ।। १२

There was never a time that I did not exist, nor you nor these kings. Nor will any of us cease to exist in the future.

नत्विति। न त्वेव जातु कदाचिद् अहं नाऽऽसम् किन्त्वासमेव। अतीतेषु देहोत्पत्ति-विनाशेषु घटादिषु वियदिव नित्य एवाहमासम् इत्यभिप्रायः। तथा न त्वं नाऽऽसीः किन्त्वासीरेव। तथा नेमे जनाधिपाः नाऽऽसन् किन्त्वासन्नेव। तथा न चैव न भविष्यामः किन्तु भविष्याम एव सर्वे वयम् अतः अस्माद्देहविनाशात् परम् उत्तरकालेऽपि। त्रिष्वपि कालेषु नित्या आत्म-स्वरूपेणेत्यर्थः।

देह-भेदानुवृत्त्या बहुवचनं नात्मभेद-अभिप्रायेण।। १२ ।।

तत्र कथमिव नित्यः आत्मा इति दृष्टान्तमाह -

**देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।**

**तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति।। १३।।**

यथा अस्मिन् देहे देहिनः कौमारं यौवनं जरा (च) तथा देहान्तरप्राप्तिः । तत्र धीरः न मुह्यति।। १३

Just as, how, for an indweller of this body, the *jīva*, there is childhood, youth, and old age, so too, is the gaining of another body. With reference to that, a wise person does not come to grief.

देहिन इति। देहोऽस्यास्तीति देही तस्य देहिनः देहवत आत्मनः अस्मिन् वर्त्तमाने देहे यथा येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था यौवनं यूनो भावो मध्यमावस्था जरा वयोहानिर्जीर्णावस्थेत्येतास्तिस्रोवस्था अन्योन्य-विलक्षणाः। तासां प्रथमावस्था-नाशे न नाशो द्वितीयावस्थोपजनने नोपजननमात्मनः। किं तर्हि अविक्रियस्यैव द्वितीयतृतीयावस्था-प्राप्तिरात्मनो दृष्टा। तथा तद्वदेव देहादन्यो देहो देहान्तरं तस्य प्राप्तिः देहान्तरप्राप्तिः अविक्रियस्यैव आत्मन इत्यर्थः। धीरः धीमान् तत्र एवं सति न मुह्यति न मोहमापद्यते।। १३ ।।

यद्यपि आत्मविनाशनिमित्तः मोहः न सम्भवति नित्यः आत्मा इति विजानतः तथापि शीतोष्णसुखदुःख-प्राप्तिनिमित्तः मोहः लौकिकः दृश्यते सुखवियोगनिमित्तः दुःखसंयोगनिमित्तः च शोकः इत्येतदर्जुनस्य वचनमाशङ्क्य आह -

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**

**आगमापायिनोऽनित्याः तांस्तितिक्षस्व भारत।।**

कौन्तेय शीतोष्णसुखदुःखदाः मात्रास्पर्शाः तु आगमापायिनः। अनित्याः। भारत तान् तितिक्षस्व।। १४

Oh! Son of Kuntī, the contacts of the sense organs with the sensory world which give rise to cold and heat, pleasure and pain, which have the nature of coming and going are not constant. Endure them. Oh! Descendant of Bharata.

मात्रास्पर्शा इति। मात्रा आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनीन्द्रियाणि, मात्राणां स्पर्शाः शब्दादिभिः संयोगाः ते शीतोष्णसुखदुःखदाः शीतम् उष्णं सुखं दुःखं च प्रयच्छन्तीति।

अथवा स्पृश्यन्ते इति स्पर्शा विषयाः शब्दादयः।

मात्राश्च स्पर्शाश्च शीतोष्ण-सुखदुःखदाः शीतं कदाचित् सुखं, कदाचिद् दुःखं, तथोष्णमप्यनियतरूपम्।

सुख-दुःखे पुनर्नियत-रूपे यतो न व्यभिचरतोऽतः ताभ्यां पृथक् शीतोष्णयोर्ग्रहणम्।

यस्मात् ते मात्रा-स्पर्शादयः आगमापायिनः आगमापाय-शीलाः तस्माद् अनित्याः। अतः तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व।

तेषु हर्षं विषादं च मा कार्षीः इत्यर्थः।। १४ ।।

शीतोष्णादीन् सहतः किं स्याद् इति श्रृणु -

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**

**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते।। १५**

पुरुषर्षभ हि यं समदुःखसुखं धीरं पुरुषं एते न व्यथयन्ति सः अमृतत्वाय कल्पते।। १५

Oh! Arjuna, the prominent among men, the person whom these (*sukha* and *duḥkha*) do not affect, who is the same in pleasure and pain, and who is discriminative, is fit for gaining liberation.

यं हीति। यं हि पुरुषं समदुःखसुखं समे दुःख-सुखे यस्य तं सम-दुःख-सुखं सुख-दुःख-प्राप्तौ हर्ष-विषाद-रहितं धीरं धीमन्तं न व्यथयन्ति न चालयन्ति नित्यात्म-दर्शनाद् एते यथोक्ताः शीतोष्णादयः सः नित्यात्म-दर्शन-निष्ठो द्वन्द्व-सहिष्णुः अमृतत्वाय अमृतभावाय मोक्षाय कल्पते समर्थो भवति।। १५ ।।

इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं यस्मात् -

**नासतो विद्यते भावः नाभावो विद्यते सतः ।**

**उभयोरपि दृष्टोऽन्तः त्वनयोस्तत्वदर्शिभिः ।। १६**

असतः भावः न विद्यते । सतः अभावः न विद्यते। तत्वदर्शिभिः तु अनयोः उभयोः अपि अन्तः दृष्टः । १६

For the unreal (*mithyā*), there is never any being. For the real, there is never any non-being. The ultimate truth of both of these is seen by the knowers of the truth.

नासत इति। नासतः अविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता।

न हि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तु सम्भवति।

विकारो हि सः, विकारश्च व्यभिचरति।

यथा धटादि-संस्थानं चक्षुषा निरूप्यमाणं मृद्वयतिरेकेणानुपलब्धेरसत्, तथा सर्वो विकारः कारण-

व्यतिरेकेणानुपलब्धेरसन्।

जन्म-प्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः (कार्यस्य घटादेः), मृदादि-कारणस्य तत्कारणस्य च तत्कारण-

व्यतिरेकेण अनुपलब्धेः असत्वम्।।

तदसत्त्वे च सर्वाभाव-प्रसङ्ग इति चेत्।

न। सर्वत्र बुद्धि-द्वयोपलब्धेः सद्बुद्धिरसद्बुद्धिरिति।

यद्विषया बुद्धिर्न व्यभिचरति तत्सत्, यद्विषया बुद्धिर्व्यभिचरति तदसद् इति सदसद्विभागे बुद्धि-तन्त्रे

स्थिते सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे, न नीलोत्पलवत्, सन्घटः सन्पटः सन्हस्तीति।

एवं सर्वत्र। तयोर्बुद्ध्योर्घटादिबुद्धिः व्यभिचरति। तथा च दर्शितम्। न तु सद्बुद्धिः।

तस्माद् घटादि-बुद्धि-विषयोऽसन् व्यभिचारात्, न तु सद्बुद्धि-विषयोऽव्यभिचारात्।।

घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत्।

न। पटादावपि सद्बुद्धि-दर्शनात्। विशेषण-विषयैव सा सद्बुद्धिः। (अतोऽपि न विनश्यति।)

सद्बुद्धिवद् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत्।

न। पटादावदर्शनात्।

सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेत्।

न। विशेष्याभावात्। सद्बुद्धिर्विशेषण-विषया सती विशेष्य-अभावे विशेषणानुपपत्तौ किंविषया स्यात्,

न तु पुनः सद्बुद्धेर्विषयाभावात्।

एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेत्।

न। इदमुदकमिति मरीच्यादौ अन्यतराभावेऽपि सामानाधिकरण्यदर्शनात्।।

तस्माद् देहादेर्द्वन्द्वस्य च सकारणस्यासतो न विद्यते भाव इति।

तथा सतः चात्मनः अभावः अविद्यमानता न विद्यते, सर्वत्राव्यभिचारादित्यवोचाम।

एवमात्मानात्मनोः सदसतोः उभयोरपि दृष्टः उपलब्धः अन्तः निर्णयः सत् सदेव, असद् असदेव, इति

त्वनयोः यथोक्तयोः तत्त्वदर्शिभिः।

तदिति सर्वनाम, सर्वं च ब्रह्म, तस्य नाम तत् इति।

तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यम्।

तद् द्रष्टुं शीलं येषां ते तत्त्व-दर्शिनः। तैः तत्त्व-दर्शिभिः।

त्वमपि तत्त्व-दर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियत-रूपाणि द्वन्द्वानि

विकारोऽयम् असन्नेव मरीचि-जलवन्मिथ्याऽवभासते इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः।।

१६ ।।

किं पुनस्तत् यत् सदेव सर्वदा एव अस्तीत्युच्यते -

**अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।**

**विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति।। १७**

अनाशिनः अप्रमेयस्य नित्यस्य शरीरिणः इमे देहाः अन्तवन्तः (इति विवेकिभिः) उक्ताः। भारत तस्माद् युध्यस्व। १८

Know that, by which this entire world is pervaded, to be indeed indestructible. No one can bring about the destruction of the one that does not change.

अविनाशीति। अविनाशि न विनष्टुं शीलमस्येति।

तुशब्दोऽसतो विशेषणार्थः।

तद्विद्धि विजानीहि। किम् येन सर्वमिदं जगत् ततं व्याप्तं सदाख्येन ब्रह्मणा साकाशम्।

आकाशेनेव घटादयः।

विनाशम् अदर्शनमभावम् अव्ययस्य न व्येति उपचयापचयौ न याति इत्यव्ययं तस्य अव्ययस्य।

नैतत् सदाख्यं ब्रह्म स्वेन रूपेण व्येति व्यभिचरति निरवयवत्वाद् देहादिवत्।

नाप्यात्मीयेनात्मीयाभावात्, यथा देवदत्तो धनहान्या व्येति, न त्वेवं ब्रह्म व्येति।

अतोऽव्ययस्य अस्य ब्रह्मणो विनाशं न कश्चित् कर्त्तुमर्हति न कश्चिदात्मानं विनाशयितुं

शक्नोतीश्वरोऽपि।

आत्मा हि ब्रह्म, स्वात्मनि च क्रिया विरोधात्।। १७ ।।

किं पुनस्तदसद् यत् स्वात्मसत्तां व्यभिचरति इत्युच्यते -

**अन्तवन्त इमे देहाः नित्यस्योक्ता शरीरिणः।**

**अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत।। १८**

अनाशिनः अप्रमेयस्य नित्यस्य शरीरिणः इमे देहाः अन्तवन्तः (इति विवेकिभिः) उक्ताः। भारत तस्माद् युध्यस्व। १८

These bodies of the embodied one (the self), which is not subject to change, which is indestructible, and which is not available as an object of knowledge, are said to be subject to end. Therefore, Oh! Descendant of Bharata, fight.

अन्तवन्त इति। अन्तवन्तः अन्तो विनाशो विद्यते येषां तेऽन्तवन्तः।

यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाण-निरूपणान्ते विच्छिद्यते सा तस्या अन्तस्तथा इमे देहाः

स्वप्न-मायादेहादिवच्चान्तवन्तः नित्यस्य शरीरिणः शरीरवतः अनाशिनः अप्रमेयस्य आत्मनोऽन्तवन्त

इति उक्ताः विवेकिभिरित्यर्थः।

नित्यस्यानाशिन इति न पुनरुक्तं, नित्यत्वस्य द्विविधत्वाल्लोके, नाशस्य च।

यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते, विद्यमानोऽप्यन्यथा परिणतो व्याध्यादि-युक्तो जातो नष्टः

उच्यते।

तत्रानाशिनो नित्यस्येति द्विविधेनापि नाशेनासम्बन्धोऽस्येत्यर्थः।

अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनः, तन्माभूदिति नित्यस्यानाशिन इत्याह। अप्रमेयस्य न

प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः।

ननु आगमेनात्मा परिच्छिद्यते प्रत्यक्षादिना च पूर्वम्।

न। आत्मनः स्वतःसिद्धत्वात्।

सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति।

न हि पूर्वम् इत्थम् अहम् इत्यात्मानमप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्त्तते।

न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति।

शास्त्रं त्वन्त्यं प्रमाणम् अतद्धर्माध्यारोपण-मात्र-निवर्त्तकत्वेन प्रमाणत्वम् आत्मनि प्रतिपद्यते न

त्वज्ञातार्थज्ञापकत्वेन।

तथा च श्रुतिः “यत्साक्षाद् अपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः” (बृ. ३.४.१) इति।

यस्मादेवं नित्योऽविक्रियश्चात्मा तस्माद् युध्यस्व युद्धादुपरमं मा कार्षीरित्यर्थः।

न ह्यत्र युद्ध-कर्त्तव्यता विधीयते। युद्धे प्रवृत्त एव ह्यसौ शोक-मोह-प्रतिबद्धः तूष्णीम् आस्ते।

तस्य कर्त्तव्य-प्रतिबन्धापनयन-मात्रं भगवता क्रियते। तस्माद् युध्यस्व इत्यनुवाद-मात्रं न विधिः।। १८

।।

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्त्तकम् इत्येतस्य अर्थस्य साक्षिभूते ऋचौ

आनिनाय भगवान्।

यत्तु मन्यसे युद्धे भीष्मादयः मया हन्यन्ते अहमेव तेषां हन्ता इत्येषा बुद्धिः मृषा एव ते।

कथम् -

**य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।**

**उभौ तौ न विजानीतः नायं हन्ति न हन्यते।। १९।।**

य एनं हन्तारं (इति) वेत्ति यः च एनं हतम् मन्यते तौ उभौ न विजानीतः । (यस्मात्) अयं न हन्ति (अयं) न हन्यते।। १९

Both, the one who thinks this (self) to be the killer and the one who thinks of it as the killed, do not know. This (self) does not kill; nor is it killed.

य एनमिति। य एनं प्रकृतं देहिनं वेत्ति जानाति हन्तारं हनन-क्रियायाः कर्त्तारं यश्चैनं अन्यः मन्यते

हतं देह-हननेन हतोऽहम् इति हनन-क्रियायाः कर्मभूतं तावुभौ न विजानीतः न ज्ञातवन्तौ

अविवेकेनाऽऽत्मानमहं-प्रत्यय-विषयम्।

हन्ताहम्, हतोऽस्मि अहम् इति देह-हननेन आत्मानं यौ विजानीतः तावात्म-स्वरूपानभिज्ञौ इत्यर्थः।

यस्माद् नायम् आत्मा हन्ति न हनन-क्रियायाः कर्त्ता भवति न हन्यते न च कर्म भवतीत्यर्थः

अविक्रियत्वात्।। १९ ।।

कथम् अविक्रियः आत्मा इति द्वितीयः मन्त्रः। -

**न जायते म्रियते वा कदाचिद् नायं भूत्वा भविता वा न भूयः।**

**अजो नित्यः शाश्वतोऽयं पुराणः न हन्यते हन्यमाने शरीरे।। २०।।**

अयं कदाचिद् न जायते (कदाचिद् न) म्रियते वा । (यस्माद्) (कदाचिद् प्राक्अयम्) न भूत्वा भूयः भविता न वा। (कदाचिद् प्राक् अयम् भूत्वा भूयः न भविता न वा इति)। अयं अजः नित्यः शाश्वतः पुराणः। शरीरे हन्यमाने न हन्यते ।। २०

This (self) is never born; nor does it die. It is not that, having been, it ceases to exist again. It is unborn, eternal, undergoes no change whatsoever, and is ever new. When the body is destroyed, it is not destroyed.

न जायत इति। न जायते नोत्पद्यते। जनि-लक्षणा वस्तु-विक्रिया नात्मनो विद्यत इत्यर्थः।

न म्रियते वा। वाशब्दश्चार्थे। न म्रियते चेत्यन्त्या विनाश-लक्षणा विक्रिया प्रतिषिध्यते।

कदाचित् शब्दः सर्व-विक्रिया-प्रतिषेधैः सम्बध्यते, न कदाचिज्जायते न कदाचिन्म्रियत इत्येवम्।

यस्माद् अयम् आत्मा भूत्वा भवन-क्रियामनुभूय पश्चाद् अभविता अभावं गन्ता न, भूयः पुनः

तस्मान्न म्रियते। यो हि भूत्वा न भविता स म्रियत इत्युच्यते लोके।

वाशब्दान्नशब्दाच्चायमात्मा अभूत्वा भविता वा देहवन्न भूयः पुनः तस्मान्न जायते। यो ह्यभूत्वा भविता स जायत इत्युच्यते। नैवमात्मा। अतो न जायते।।

यस्मादेवं तस्माद् अजः यस्मान्न म्रियते तस्माद् नित्यः च।

यद्यप्याद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्य-भाविनीनां विक्रियाणां स्व-शब्दैरेव तदर्थैः प्रतिषेधः कर्त्तव्य इत्यनुक्तानामपि यौवनादि-समस्त-विक्रियाणां प्रतिषेधो यथा स्यादित्याह - शाश्वत इत्यादिना।

शाश्वतः इत्यपक्षय-लक्षणा विक्रिया प्रतिषिध्यते। शश्वद्भवः शाश्वतः।

नापक्षीयते स्वरूपेण निरवयवत्वात्। निर्गुणत्वात् च नापि गुण-क्षयेणापक्षयः।

अपक्षय-विपरीतापि वृद्धि-लक्षणा विक्रिया प्रतिषिध्यते पुराणः इति।

यो हि अवयवागमेनोपचीयते स वर्धतेऽभिनव इति चोच्यते।

अयं त्वात्मा निरवयवत्वात् पुरापि नव एवेति पुराणः। न वर्धत इत्यर्थ।ः

तथा न हन्यते न विपरिणम्यते हन्यमाने विपरिणम्यमानेऽपि शरीरे।

हन्तिरत्र विपरिणामार्थो द्रष्टव्योऽपुनरुक्ततायै। न विपरिणम्यत इत्यर्थः।

अस्मिन् मन्त्रे षड्-भाव-विकाराः लौकिक-वस्तु-विक्रिया आत्मनि प्रतिषिध्यन्ते।

सर्वप्रकार-विक्रिया-रहित आत्मेति वाक्यार्थः।

यस्मादेवं तस्माद् "उभौ तौ न विजानीतः" (गी २.१९) इति पूर्वेण मन्त्रेणास्य सम्बन्धः।। २० ।।

"य एनं वेत्ति हन्तारम्" (गी २.१९) इत्यनेन मन्त्रेण हनन-क्रियायाः कर्त्ता कर्म च न भवतीति प्रतिज्ञाय, "न जायते" (गी २.२०) इत्यनेनाविक्रियत्वे हेतुमुक्त्वा, प्रतिज्ञातार्थम् उपसंहरति -

**वेदाविनाशिनं नित्यं य एनमजमव्ययम्।**

**कथं स पुरुषः पार्थ कं घातयति हन्ति कम्।। २१।।**

यः एनम् अविनाशिनं नित्यं अजम् अव्ययम् वेद, पार्थ सः पुरुषः कं कथं घातयति कम् (कथम्) हन्ति ।। २१

Oh! Son of Pṛthā, the one who knows this (self) to be indestructible, timeless, unborn, and not subject to decline, how and whom does that person kill? Whom does he cause to kill?

वेदाविनाशिनमिति। वेद विजानाति अविनाशिनम् अन्त्य-भाव-विकार-रहितं नित्यं विपरिणाम-रहितं यः वेदेति सम्बन्धः।

एनं पूर्वेण मन्त्रेणोक्त-लक्षणम् अजं जन्म-रहितम् अव्ययम् अपक्षय-रहितं कथं केन प्रकारेण स विद्वान् पुरुषः अधिकृतो हन्ति हनन-क्रियां करोति कथं वा घातयति हन्तारं प्रयोजयति न कथञ्चित्

कञ्चिद् हन्ति, न कथञ्चित्कञ्चिद् घातयति, इत्युभयत्राक्षेप एवार्थः, प्रश्नार्थासम्भवात्।

हेत्वर्थस्य अविक्रियत्वस्य तुल्यत्वाद् विदुषः सर्व-कर्म-प्रतिषेध एव प्रकरणार्थः अभिप्रेतो भगवतः।

हन्तेः त्वाक्षेप उदाहरणार्थत्वेन कथितः।।

विदुषः कं कर्मासम्भवे हेतु-विशेषं पश्यन् कर्माण्याक्षिपति भगवान् "कथं स पुरुषः" इति

ननु उक्त एवात्मनोऽविक्रियत्वं सर्व-कर्मासम्भव-कारण-विशेषः।

सत्यमुक्तः। न तु स कारण-विशेषः। अन्यत्वाद् विदुषोऽविक्रियादात्मन इति।

न ह्यविक्रियं स्थाणुं विदितवतः कर्म न सम्भवतीति चेत्।

न। विदुष आत्मत्वात्। न देहादि-सङ्घातस्य विद्वत्ता। अतः पारिशेष्याद् असंहत आत्मा विद्वानविक्रिय

इति तस्य विदुषः कर्मासम्भवादाक्षेपो युक्तः "कथं स पुरुषः" इति।

यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन्बुद्धि-वृत्त्यविवेक-विज्ञानेनाविद्ययोपलब्धा आत्मा कल्प्यते, एवमेवाऽऽत्मानात्म-विवेक-ज्ञानेन बुद्धि-वृत्त्या विद्यया असत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वान् उच्यते। विदुषः कर्मासम्भव-वचनाद्यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवतो निश्चयोऽवगम्यते।।

ननु विद्याप्यविदुष एव विधीयते विदित-विद्यस्य पिष्ट-पेषणवद् विद्या-विधानानर्थक्यात्। तत्राविदुषः कर्माणि विधीयन्ते, न विदुषः, इति विशेषो नोपपद्यते इति चेत्।

न। अनुष्ठेयस्य भावाभावविशेषोपपत्तेः। अग्निहोत्रादि-विध्यर्थज्ञानोत्तरकालमग्निहोत्रादि-कर्म अनेक-साधनोपसंहार-पूर्वकमनुष्ठेयम्, कर्त्ताहं, मम कर्त्तव्यम् इत्येवं-प्रकार-विज्ञानवतोऽविदुषो यथा अनुष्ठेयं भवति, न तु तथा "न जायते" इत्याद्यात्म-स्वरूप-विध्यर्थ-ज्ञानोत्तर-काल-भावि किञ्चिदनुष्ठेयं भवति।

किन्तु नाहं कर्त्ता, न भोक्ता इत्याद्यात्मैकत्वाकर्त्तृत्वादि-विषय-ज्ञानादन्यन्नोत्पद्यत इत्येष विशेष उपपद्यते।।

यः पुनः कर्त्ताहम् इति वेत्त्यात्मानं तस्य ममेदं कर्त्तव्यम् इति अवश्यं-भाविनी बुद्धिः स्यात् तदपेक्षया सोऽधिक्रियते इति तं प्रति कर्माणि। स चाविद्वान्, "उभौ तौ न विजानीतः" (गी २.१९) इति वचनात्। विशेषितस्य च विदुषः कर्माक्षेप-वचनात्, "कथं स पुरुषः" (गी २.२१) इति। तस्माद्विशेषितस्याविक्रियात्म-दर्शिनो विदुषो मुमुक्षोश्च सर्व-कर्म-संन्यासे एवाधिकारः।।

अत एव भगवान् नारायणः सांख्यान् विदुषः, अविदुषश्च कर्मिणः, प्रविभज्य द्वे निष्ठे ग्राहयति "ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्" (गी ३.३) इति। तथा च पुत्रायाऽऽह भगवान् व्यासः

“द्वाविमावथ पन्थानौ” (म.भा.मो.ध २४.६) इत्यादि। तथा च “क्रिया-पथश्चैव पुरस्तात् पश्चात्

संन्यासश्च” (तै.आ. १०.६२.१२) इति। एतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान्।

अतत्त्ववित् तु “अहङ्कार-विमूढात्मा कर्त्ताहमिति मन्यते” (गी ३.२७), “तत्त्ववित्तु” (गी ३.२८)

नाहं करोमि इति। तथा च “सर्वकर्माणि मनसा संन्यस्यास्ते” (गी ५.१३) इत्यादि।।

तत्र केचित् पण्डितंमन्या वदन्ति - जन्मादि-षड्भाव-विक्रिया-रहितोऽविक्रियः अकर्त्तैकोऽहमात्मा इति

न कस्यचित् ज्ञानमुत्पद्यते यस्मिन् सति सर्व-कर्म-संन्यासः उपदिश्यते इति।

तन्न। “न जायते (भ.गी. २.२०) इत्यादि शास्त्रोपदेश-अनर्थक्यात्।

यथा च  शास्त्रोपदेशसामर्थ्याद् धर्मास्तित्व-विज्ञानं, कर्त्तुश्च देहान्तर-सम्बन्धि-ज्ञानं च, उत्पद्यते।

तथा शास्त्रात् तस्यैवात्मनोऽविक्रियत्वाकर्त्तृत्वैकत्वादि-विज्ञानं कस्माद् नोत्पद्यते इति प्रष्टव्यास्ते।।

करणागोचरत्वादिति चेत्।

न। "मनसैवानुद्रष्टव्यम्" (बृ. ४.४.१९) इति श्रुतेः।

शास्त्राचार्योपदेश-शम-दमादि-संस्कृतं मन आत्मदर्शने करणम्। तथा च तदधिगमायानुमाने आगमे च

सति ज्ञानं नोत्पद्यत इति साहसमेतत्।

ज्ञानं चोत्पद्यमानं तद्विपरीतम् अज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यम्।

तच्चाज्ञानं दर्शितं हन्ताऽहं हतोऽस्मि इति, "उभौ तौ न विजानीतः" (गी २.१९) इति। अत्र चात्मनो

हनन-क्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञान-कृतं दर्शितम्।

तच्च सर्व-क्रियास्वपि समानं कर्तृत्वादेरविद्या-कृतत्वम् अविक्रियत्वादात्मनः।

विक्रियावान् हि कर्त्ता आत्मनः कर्मभूतमन्यं प्रयोजयति कुरु इति। तदेतदविशेषेण विदुषः सर्वक्रियासु

कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् विदुषः कर्माधिकाराभाव-प्रदर्शनार्थं "वेदाविनाशिनं..."

“कथं स पुरुषः” इत्यादिना। क्व पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव “ज्ञानयोगेन साङ्ख्यानाम्” (गी

३.३) इति। तथा च सर्व-कर्म-संन्यासं वक्ष्यति “सर्वकर्माणि मनसा” (गी ५.१३) इत्यादिना।।

ननु मनसा इति वचनान्न वाचिकानां कायिकानां च संन्यास इति चेत्।

न। सर्व-कर्माणि इति विशेषितत्वात्।

मानसानामेव सर्व-कर्मणाम् इति चेत्।

न। मनोव्यापार-पूर्वकत्वाद् वाक्काय-व्यापाराणां, मनोव्यापार -अभावे तदनुपपत्तेः।

शास्त्रीयाणां वाक्काय-कर्मणां कारणानि मानसानि वर्जयित्वा अन्यानि सर्व-कर्माणि मनसा संन्यसेत्

इति चेत्।

न। “नैव कुर्वन्न कारयन्” (गी ५.१३) इति विशेषणात्।

सर्व-कर्म-संन्यासोऽयं भगवतोक्तो मरिष्यतो न जीवत इति चेत्।

न। नवद्वारे पुरे देही आस्ते (गी ५.१३) इति विशेषणानुपपत्तेः।

न हि सर्व-कर्म-संन्यासेन मृतस्य  तद्देह आसनं सम्भवति।

अकुर्वतोऽकारयतश्च देहे संन्यस्य इति सम्बन्धः, न देह आस्ते इति चेत्।

न। सर्वत्र आत्मनोऽविक्रियत्वावधारणात्।

आसनक्रियायाः च अधिकरणापेक्षत्वात्, तदनपेक्षत्वाच्च संन्यासस्य।

संपूर्वस्तु न्यास-शब्दः इह त्यागार्थः, न निक्षेपार्थः।

तस्माद् गीताशस्त्रे आत्मज्ञानवतः संन्यास एवाधिकारः, न कर्मणि इति तत्र तत्रोपरिष्टादात्म-ज्ञान-

प्रकरणे दर्शयिष्यामः।।२१।।

प्रकृतं तु वक्ष्यामः। तत्र आत्मनः अविनाशित्वं प्रतिज्ञातं तत्किमिव इत्युच्यते -

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि ।**

**तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही।। २२।।**

यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति ।। २२

Just as a person gives up old clothes and takes up new ones, so too, the indweller of the body gives up old bodies and takes others which are new.

वासांसीति। वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवानि अभिनवानि गृह्णाति उपादत्ते नरः पुरुषः अपराणि अन्यानि तथा तद्वदेव शरीराणि विहाय जीर्णानि अन्यानि संयाति सङ्गच्छति नवानि देही आत्मा।

पुरुषवदविक्रियः एवेत्यर्थः।। २२ ।।

कस्मादविक्रिय एव इत्याह -

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**

**न चैनं क्लेदयन्त्यापः न शोषयति मारुतः।। २३**

शस्त्राणि एनं न छिन्दन्ति । पावकः एनं न दहति । आपः च एनं न क्लेदयन्ति । मारुतः न शोषयति। २३

Weapons do not cut this (self); nor does fire burn it. Water does not wet (or drown) it and wind does not dry it.

नैनं छिन्दन्तीति। एनं प्रकृतं देहिनं न छिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति

शस्त्राण्यस्यादीनि। तथा नैनं दहति पावकः अग्निरपि न भस्मीकरोति। तथा न एनं क्लेदयन्त्यापः।

अपां हि सावयवस्य वस्तुन आर्द्रीभाव-करणेनावयव-विश्लेषापादने सामर्थ्यम्।

तन्न निरवयव आत्मनि सम्भवति। तथा स्नेहवद् द्रव्यं स्नेह-शोषणेन नाशयति वायुः।

एनं स्वात्मानं न शोषयति मारुतः अपि।। २३ ।।

यतः एवं तस्माद् छ

**अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**

**नित्यः सर्वगतः स्थाणुः अचलोऽयं सनातनः।। २४।।**

अयम् अच्छेद्यः एव अयम् अदाह्यः (एव) अक्लेद्यः (एव) अशोष्यः (एव) च । अयं नित्यः सर्वगतः स्थाणुः अचलः सनातनः (भवति)।। २४

This (self) cannot be cut, burnt, drowned, or dried. It is changeless, all-pervading, stable, immovable, and eternal.

अच्छेद्योऽयमिति। यस्मादन्योन्य-नाश-हेतूनि भूतान्येनम् आत्मानं नाशयितुं नोत्सहन्ते तस्माद् नित्यः।

नित्यत्वात् सर्वगतः। सर्वगतत्वात् स्थाणुः स्थाणुः इव स्थिर इत्येतत्।

स्थिरत्वाद् अचलोयम् आत्मा। अतः सनातनः चिरन्तनः।

न कारणात् कुतश्चिद् निष्पन्नोऽभिनव इत्यर्थः।।

नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयम्।

यद् एकेनैव श्लोकेनात्मनो नित्यत्वम् अविक्रियत्वं चोक्तं “न जायते म्रियते वा” (गी २.२०)

इत्यादिना। तत्र यदेवात्म-विषयं किञ्चिदुच्यते तदेतस्माद् श्लोकार्थान्नातिरिच्यते, किञ्चित् शब्दतः

पुनरुक्तं किञ्चिदर्थत इति।

दुर्बोधत्वादात्म-वस्तुनः पुनः पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः,

कथं नु नाम संसारिणाम् अव्यक्तं तत्त्वं बुद्धि-गोचरतामापन्नं सत् संसार-निवृत्तये स्यादिति।।२४।।

किं च -

**अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।**

**तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि।। २५।।**

अयम् अव्यक्तः उच्यते (अभियुक्तैः) अयम् अचिन्त्यः (उच्यते अभियुक्तैः) अयम् अविकार्यः (उच्यते अभियुक्तैः) । तस्माद् एनं एवं विदित्वा अनुशोचितुम् न अर्हसि ।। २५

This self is said to be unmanifest, not an object of thought, and not subject to change. Therefore, knowing this, you should not grieve.

अव्यक्तोऽयमिति। अव्यक्तः सर्व-करणाविषयत्वाद् न व्यज्यते इत्यव्यक्तः अयम् आत्मा। अत एव अचिन्त्यः अयम्। यद्धीन्द्रिय-गोचरं वस्तु तच्चिन्ता-विषयत्वम् आपद्यते। अयं त्वात्माऽनिन्द्रिय-गोचरत्वादचिन्त्यः। अत एव अविकार्यः अयम्। यथा क्षीरं दध्यातञ्चनादिना विकारि न तथाऽयमात्मा। निरवयवत्वाच्चाविक्रियः। न हि निरवयवं किञ्चिद् विक्रियात्मकं दृष्टम्। अविक्रियत्वाद् अविकार्यः अयमात्मा उच्यते। तस्माद् एवं यथोक्त-प्रकारेण एनम् आत्मानं विदित्वा त्वं नानुशोचितुमर्हसि हन्ताहम् एषाम् मया एते हन्यन्ते इति।। २५ ।।

आत्मनः अनित्यत्वम् अभ्युपगम्य इदमुच्यते -

**अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।**

**तथापि त्वं महाबाहो नैवं शोचितुमर्हसि।। २६**

अथ च एनं नित्यजातं नित्यं मृतम् वा मन्यसे तथापि महाबाहो त्वं एवं शोचितुम् न अर्हसि।। २६

And if you take the *ātman* to have constant birth and death, even then, Oh! Mighty armed, Arjuna, you ought not to grieve for the *ātman* in this manner.

अथ चैनमिति। अथ च इत्यभ्युपगमार्थः।

एनं प्रकृतमात्मानं नित्यजातं लोक-प्रसिद्ध्या प्रत्यनेक-शरीरोत्पत्तिं जातो जात इति मन्यसे।

तथा प्रति-तद्विनाशं नित्यं वा मन्यसे मृतं मृतो मृत इति। तथापि तथा-भाविन्यप्यात्मनि त्वं महाबाहो

एवं न शोचितुमर्हसि जन्मवतो नाशो नाशवतो जन्म च इत्येतौ अवश्यंभाविनाविति।। २६ ।।

तथा च सति -

**जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।**

**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।। २७**

हि जातस्य मृत्युः ध्रुवः (अस्ति) । मृतस्य च जन्म ध्रुवं (अस्ति) । तस्माद् त्वं अपरिहार्ये अर्थे शोचितुम् न अर्हसि ।।

Because, for that which is born, death is certain and for that which is dead, birth is certain, therefore, you should not grieve over that which cannot be altered.

जातस्येति। जातस्य हि लब्ध-जन्मनो ध्रुवः अव्यभिचारी मृत्युः मरणं ध्रुवं जन्म मृतस्य च।

तस्माद् अपरिहार्योऽयं जन्म-मरण-लक्षणोऽर्थः।

तस्मिन् अपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।। २७ ।।

कार्यकरणसंघातात्मकानि अपि भूतानि उद्दिश्य शोको न युक्तः कर्त्तुं यतः -

**अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।**

**अव्यक्तनिधनान्येव तत्र का परिदेवना।। २८।।**

भारत भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि एव । तत्र का परिदेवना।। २८

All beings are unmanifest in the beginning, manifest in the middle, and (again) unmanifest in the end. What indeed is there to grieve about, Oh! Bhārata?

अव्यक्तादीनीति। अव्यक्तादीनि अव्यक्तमदर्शनमनुपलब्धिः आदिर्येषां भूतानां पुत्र-मित्रादि-कार्य-करण-सङ्घातात्मकानां तान्यव्यक्तादीनि भूतानि प्रागुत्पत्तेः। उत्पन्नानि च प्राङ्मरणाद् व्यक्त-मध्यानि। अव्यक्त-निधनान्येव पुनरव्यक्तमदर्शनं निधनं मरणं येषां तान्यव्यक्तनिधनानि। मरणादूर्ध्वम् अपि अव्यक्ततामेव प्रतिपद्यन्त इत्यर्थः। तथा चोक्तम् - "अदर्शनादापतितः पुनश्चादर्शनं गतः। नासौ तव न तस्य त्वं वृथा का परिदेवना" (म.भा.स्त्री. २-१३) इति। तत्र का परिदेवना को वा प्रलापः - अदृष्ट-दृष्ट-प्रणष्ट-भ्रान्ति-भूतेषु भूतेष्वित्यर्थः।। २८ ।।

दुर्विज्ञेयोऽयं प्रकृतः आत्मा। किं त्वामेव एकमुपालभे साधारणे भ्रान्तिनिमित्ते। कथं दुर्विज्ञेयोऽयमात्मा

इत्याह -

**आश्चर्यवत्पश्यति कश्चिदेनं आश्चर्यवद्वदति तथैवचान्यः।**

**आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्।। २९।।**

कश्चिद् एनं आश्चर्यवत् पश्यति । तथा एव च अन्यः (एनम्) आश्चर्यवद् वदति । अन्यः च एनम् आश्चर्यवत् श्रृणोति । कश्चित् च एनं श्रुत्वा अपि न एव वेद ।। २९

One looks upon the self as a wonder. Similarly, another speaks of it as a wonder and another hears it as a wonder. Still another, even after hearing about this self, does not understand it at all.

आश्चर्यवदिति। आश्चर्यवद् आश्चर्यमदृष्टपूर्वमद्भुतम् अकस्माद्दृश्यमानं तेन तुल्यम् आश्चर्यवद् आश्चर्यमिव एनम् आत्मानं पश्यति कश्चिद्। आश्चर्यवद् एनं वदति तथैव चान्यः। आश्चर्यवच्चैनमन्यः श्रृणोति। श्रुत्वा दृष्ट्वोक्त्वा अप्येनम् आत्मानं वेद न चैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्य-तुल्यो यो वदति यश्च श्रृणोति सोऽनेक-सहस्रेषु कश्चिदेव भवति। अतो दुर्बोध आत्मेत्यभिप्रायः।। २९ ।।

अथ इदानीं प्रकरणार्थम् उपसंहरन् ब्रूते -

**देही नित्यमवध्योऽयं देहे सर्वस्य भारत।**

**तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि।। ३०।।**

भारत अयं देही सर्वस्य देहे नित्यम् अवध्यः। तस्मात् त्वं सर्वाणि भूतानि (प्रति) शोचितुम् न अर्हसि।। ३०

This *ātman*, the indweller of the bodies of all beings, is ever indestructible, Oh! Descendant of Bharata. Therefore, you ought not to grieve for all these people.

देहीति। देही शरीरी नित्यं सर्वदा सर्वावस्थासु अवध्यः निरवयवत्वान्नित्यत्वाच्च तत्रावध्यः अयं देहे शरीरे सर्वस्य सर्वगतत्वात् स्थावरादिषु स्थितोऽपि। सर्वस्य प्राणि-जातस्य देहे वध्यमानेऽप्ययं देही न वध्यो यस्मात्, तस्माद् भीष्मादीनि सर्वाणि भूतानि उद्दिश्य न त्वं शोचितुमर्हसि।। ३० ।।

इह परमार्थतत्वापेक्षायां शोको वा मोहो वा न सम्भवति इत्युक्तं न केवलं परमार्थतत्वापेक्षायाम् एव

किन्तु -

**स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।**

**धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते।। ३१।।**

हि क्षत्रियस्य धर्म्याद् युद्धात् अन्यत् श्रेयः न विद्यते (तस्मात्) स्वधर्मम् अवेक्ष्य अपि च विकम्पितुम् न अर्हसि ।। ३१

And also, from the standpoint of your own duty, you should not waver. For there is nothing greater for a *kṣatriya* than a righteous war.

स्वधर्ममिति। स्वधर्ममपि स्वो धर्मः क्षत्रियस्य युद्धं तमपि अवेक्ष्य त्वं न विकम्पितुं प्रचलितुं न अर्हसि। धर्म्यात् क्षत्रियस्य स्वाभाविकाद् धर्मादात्मस्वाभाव्यादित्यभिप्रायः।

तच्च युद्धं पृथिवी-जय-द्वारेण धर्मार्थं प्रजा-रक्षणार्थं चेति धर्मादनपेतं परं धर्म्यम्। तस्माद् धर्म्याद् युद्धात् श्रेयोऽन्यत्क्षत्रियस्य न विद्यते हि यस्मात्।। ३१ ।।

कुतश्च तद्युद्धं कर्त्तव्यम् इत्युच्यते -

**यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।**

**सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्।। ३२।।**

पार्थ सुखिनः क्षत्रियाः यदृच्छया उपपन्नं अपावृतम् स्वर्गद्वारम् च ईदृशं युद्धम् लभन्ते ।। ३२

And, Oh! Son of Pṛthā, only lucky *kṣatriya*s get this kind of battle, which has come by chance and which is an open gate to heaven.

यदृच्छयेति। यदृच्छया चाप्रार्थिततया उपपन्नम् आगतं स्वर्गद्वारमपावृतम् उद्घाटितम्।

ये तद् ईदृशं युद्धं लभन्ते क्षत्रियाः हे पार्थ किं न सुखिनः ते।। ३२ ।।

एवं कर्त्तव्यताप्राप्तमपि -

**अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि।**

**ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि।। ३३।।**

अथ त्वम् इमं धर्म्यं संग्रामं न करिष्यसि चेत् ततः स्वधर्मं कीर्त्तिं च हित्वा पापमवाप्स्यसि।। ३३

But if you refuse to engage in this war which is in keeping with *dharma*, then, forfeiting your own duty and honour, you will incur sin.

अथ चेदिति। अथ चेत् त्वमिमं धर्म्यं धर्मादनपेतं सङ्ग्रामं युद्धं न करिष्यसि चेत् ततः तदकरणात् स्वधर्मं कीर्त्तिं च महादेवादि-समागम-निमित्तां हित्वा केवलं पापम् अवाप्स्यसि।। ३३ ।।

न केवलं स्वधर्मकीर्त्तिपरित्यागः -

**अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।**

**सम्भावितस्य चाकीर्त्तिः मरणादतिरिच्यते।। ३४**

अपि च भूतानि ते अव्ययाम् अकीर्त्तिं कथयिष्यन्ति । संभावितस्य अकीर्त्तिः मरणादतिरिच्यते च ।। ३४

Also, people will speak of your unending infamy. For the honoured, dishonour is surely worse than death.

अकीर्त्तिमिति। अकीर्त्तिं चापि भूतानि कथयिष्यन्ति ते तव अव्ययां दीर्घकालाम्। धर्मात्मा शूर इत्येवमादिभिर्गुणैः सम्भावितस्य च अकीर्त्तिः मरणादतिरिच्यते। सम्भावितस्य चाकीर्त्तेर्वरं मरणमित्यर्थः।। ३४ ।।

किञ्च -

**भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।**

**येषां च त्वं बहुमतः भूत्वा यास्यसि लाघवम्।। ३५।।**

येषां च त्वं बहुमतः (ते) महारथाः त्वां भयाद् रणाद् उपरतं मंस्यन्ते (युद्धादुपरतः) भूत्वा (सर्वेषां) लाघवम् यास्यसि ।। ३५

The great warriors will consider you as having retreated from the battle due to fear. And you, having been so highly esteemed by them, will fall in their esteem.

भयादिति। भयाद् कर्णादिभ्यो रणाद् युद्धाद् उपरतं निवृत्तं मंस्यन्ते चिन्तयिष्यन्ति, न कृपया, इति

त्वां महारथाः दुर्योधन-प्रभृतयः।

येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं बहुमतो भूत्वा पुनः यास्यसि लाघवं लघु-

भावम्।। ३५।।

किं च -

**अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।**

**निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्।। ३६।।**

तव अहिताः तव सामर्थ्यं निन्दन्तः अवाच्यवादान् बहून् वदिष्यन्ति । ततः दुःखतरं किम् नु । ३६

And belittling your prowess, your enemies will say many unutterable things about (you). Is there anything more painful than that?

अवाच्यवादानिति। अवाच्य-वादान् अवक्तव्य-वादान् च बहून् अनेक-प्रकारान् वदिष्यन्ति तवाहिताः

शत्रवो निन्दन्तः कुत्सयन्तः तव त्वदीयं सामर्थ्यं निवात-कवचादि-युद्धनिमित्तम्।

तस्मात् ततः निन्दा-प्राप्तेर्दुःखाद् दुःखतरं नु किम् ततः कष्टतरं दुःखं नास्तीत्यर्थः।। ३६ ।।

युद्धे पुनः क्रियमाणे कर्णादिभिः -

**हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।**

**तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।। ३७ ।।**

हतः (सन्) स्वर्गं प्राप्स्यसि वा जित्वा महीम् भोक्ष्यसे वा । कौन्तेय तस्माद् युद्धाय कृतनिश्चयः उत्तिष्ठ ।। ३७

Destroyed, you will gain heaven; victorious, you will enjoy the world. Therefore, Oh! Son of Kuntī, get up, having resolved to fight!

हतो वेति। हतो वा प्राप्स्यसि स्वर्गं हतः सन् स्वर्गं प्राप्स्यसि।

जित्वा वा कर्णादीञ्शूरान् भोक्ष्यसे महीम्। उभयथापि तव लाभ एवेत्यभिप्रायः।

यत एवं तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः जेष्यामि शत्रून्, मरिष्यामि वा इति निश्चयं

कृत्वेत्यर्थः।। ३७ ।।

तत्र युद्धं स्वधर्मः इत्येवं युध्यमानस्य उपदेशमिमं श्रृणु -

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**

**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।। ३८**

सुखदुःखे लाभालाभौ जयाजयौ समे कृत्वा ततः युद्धाय युज्यस्व । एवं पापम् न अवाप्स्यसि।। ३८

Taking pleasure and pain, gain and loss, victory and defeat to be the same, prepare for battle. Thus, you will incur no sin.

सुखदुःखे इति। सुखदुःखे समे तुल्ये कृत्वा रागद्वेषौ अकृत्वेत्येतत्।

तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व।

नैवं युद्धं कुर्वन् पापम् अवाप्स्यसि।

इत्येष उपदेशः प्रासङ्गिकः।। ३८ ।।

शोकमोहापनयनाय लौकिकः न्यायः "स्वधर्ममपि च अवेक्ष्य" इत्याद्यैः श्लोकैः उक्तः, न तु तात्पर्येण, परमार्थदर्शनं तु इह प्रकृतं (२.११) तच्चोक्तम् (२.२०) उपसंहरति "एषा तेऽभिहिता" इति शास्त्रविषय-विभाग-प्रदर्शनाय। इह हि दर्शिते पुनः शास्त्रविषयविभागे उपरिष्टात् "ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" इति निष्ठा-द्वयविषयं शास्त्रं सुखं प्रवर्त्तिष्यते, श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्ति, इत्यत आह -

**एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां श्रृणु।**

**बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि।। ३९।।**

पार्थ एषा सांख्ये बुद्धिः ते अभिहिता। तु यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि (ताम्) इमां योगे (बुद्धिं) श्रृणु ।। ३९

This wisdom with reference to self-knowledge has so far been told to you. Now listen also to the wisdom of *yoga*, endowed with which you will get rid of the bondage of action, Oh! Son of Pṛthā.

एषा ते इति। एषा ते तुभ्यम् अभिहिता उक्ता सांख्ये परमार्थ-वस्तु-विवेक-विषये बुद्धिः ज्ञानं

साक्षाच्छोक-मोहादि-संसार-हेतु-दोष-निवृत्ति-कारणम्।

योगे तु तत्प्रा''युपाये निःसङ्गतया द्वन्द्व-प्रहाण-पूर्वकम् ईश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे

च इमाम् अनन्तरम् एवोच्यमानां बुद्धिं श्रृणु।

तां बुद्धिं स्तौति प्ररोचनार्थम्।

बुद्ध्या यया योग-विषयया युक्तो हे पार्थ कर्मबन्धं कर्मैव धर्माधर्माख्यो बन्धः कर्मबन्धस्तं प्रहास्यसि

ईश्वर-प्रसाद-निमित्त-ज्ञान-प्राप्तेः इत्यभिप्रायः।। ३९ ।।

किंचान्यत् -

**नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।**

**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।।४०**

इह अभिक्रमनाशः न अस्ति । प्रत्यवायः न विद्यते। अस्य धर्मस्य स्वल्पम् अपि महतः भयात् त्रायते ।। ४०

In this, there is no waste of effort, nor are the opposite results produced. Even very little of this *karma-yoga* protects one from great fear.

नेहेति। नेह मोक्षमार्गे कर्मयोगे अभिक्रमनाशः अभिक्रमणं अभिक्रमः प्रारम्भः तस्य नाशो न अस्ति यथा कृष्यादेः। योग-विषये प्रारम्भस्य नानैकान्तिक-फलत्वम् इत्यर्थः।

किञ्च न अपि चिकित्सावत् प्रत्यवायो विद्यते। किन्तु भवति। स्वल्पमप्यस्य योग-धर्मस्य अनुष्ठितं त्रायते रक्षति महतो संसार-भयात् जन्म-मरणादि-लक्षणात्।। ४०।।

येऽयं सांख्ये बुद्धिः उक्ता योगे च वक्ष्यमाणलक्षणा सा -

**व्यवसायात्मिका बुद्धिः एकेह कुरुनन्दन। बहुशाखा ह्यनन्ताश्च**

**बुद्धयोऽव्यवसायिनाम्।। ४१**

कुरुनन्दन इह व्यवसायात्मिका बुद्धिः एका । अव्यवसायिनाम् बुद्धयः बहुशाखाः अनन्ताः हि च ।। ४१

With reference to this (*mokṣa*), Oh! Descendant of Kurus, there is a single, well-ascertained understanding. The notions of those who lack discrimination are many-branched and innumerable indeed.

व्यवसायेति। व्यवसायात्मिका निश्चयस्वभावा एका एव बुद्धिः इतर-विपरीत-बुद्धि-शाखा-भेदस्य बाधिका सम्यक् प्रमाण-जनितत्वाद् इह श्रेयोमार्गे हे कुरुनन्दन। याः पुनरितरा बुद्धयः यासां शाखा-भेद-प्रचार-वशादनन्तः अपारोऽनुपरतः संसारो नित्य-प्रततो विस्तीर्णो भवति, प्रमाण-जनित-विवेक-बुद्धि-निमित्त-वशाच्चोपरतास्वनन्त-भेद -बुद्धिषु संसारोऽप्युपरमते, ता बुद्धयो बहुशाखाः बह्व्यः शाखा यासां ताः बहु-शाखाः। बहु-भेदा इत्येतत्। प्रति-शाखा-भेदेन ह्यनन्ताः च बुद्धयः। केषाम् अव्यवसायिनां प्रमाण-जनित-विवेक-बुद्धि-रहितानामित्यर्थः।। ४१ ।।

येषां व्यवसायात्मिका बुद्धिर्नास्ति ते -

**यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**

**वेदवादरताः पार्थ नान्यदस्तीति वादिनः।। ४२**

यामिति। यामिमां वक्ष्यमाणां पुष्पितां पुष्पित-वृक्ष इव शोभमानां श्रूयमाण-रमणीयां वाचं वाक्य-लक्षणां प्रवदन्ति। के अविपश्चितः अल्पमेधसोऽविवेकिन इत्यर्थः।

वेद-वादरताः बह्वर्थवाद-फल-साधन-प्रकाशकेषु वेद-वाक्येषु रता हे पार्थ न अन्यत् स्वर्ग-प्रा''यादि-फल-साधनेभ्यः कर्मभ्यः अस्तीति इत्येवं वादिनः वदन-शीलाः।। ४२ ।।

**कामात्मानः स्वर्गपराः जन्मकर्मफलप्रदाम्।**

**क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति।। ४३।।**

कामात्मान इति। ते च कामात्मानः काम-स्वभावाः काम-परा इत्यर्थः। स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते स्वर्ग-पराः स्वर्ग-प्रधानाः।

जन्मकर्मफलप्रदां कर्मणः फलं कर्म-फलं जन्मैव कर्म-फलं जन्म-कर्म-फलं तत्प्रददातीति जन्म-कर्म-फल-प्रदाः तां वाचं प्रवदन्ति इत्यनुषज्यते।

क्रियाविशेषबहुलां क्रियाणां विशेषाः क्रिया-विशेषाः ते बहुला यस्यां वाचि तां, स्वर्ग-पशु-पुत्राद्यर्था यया वाचा बाहुल्येन प्रकाश्यन्ते।

भोगैश्वर्यगतिं प्रति भोगश्चैश्वर्यं च भोगैश्वर्ये तयोर्गतिः प्राप्तिः भोगैश्वर्यगतिः तां प्रति साधन-भूता ये क्रिया-विशेषाः तद्बहुलां तां वाचं प्रवदन्तः मूढाः संसारे परिवर्त्तन्त इत्यर्थः।। ४३ ।।

**भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।**

**व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।।४४**

भोगेति। तेषां च भोगैश्वर्यप्रसक्तानां भोगः कर्त्तव्यम् ऐश्वर्यं चेति भोगैश्वर्ययोरेव प्रणयवतां तदात्म-भूतानां तया क्रिया-विशेष-बहुलया वाचा अपहृतचेतसाम् आच्छादित-विवेक-प्रज्ञानां व्यवसायात्मिका सांख्ये योगे वा बुद्धिः समाधौ समाधीयतेऽस्मिन् पुरुषोपभोगाय सर्वमिति समाधिरन्तः-करणं बुद्धिः तस्मिन्समाधौ न विधीयते न भवतीत्यर्थः।। ४४।।

पार्थ अविपश्चितः वेदवादरताः कामात्मानः स्वर्गपराः अन्यद् न अस्ति इति वादिनः याम् पुष्पितां जन्मकर्मफलप्रदाम् क्रियाविशेषबहुलां इमां वाचं भोगैश्वर्यगतिं प्रति प्रवदन्ति तया अपहृतचेतसाम् भोगैश्वर्यप्रसक्तानां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।। ४२, ४३, ४४

Oh! Son of Pṛthā, the non-discriminating people, who remain engrossed in *karma* enjoined by the Veda and its results, arguing that there is nothing other than this, those who are full of desires with heaven as their highest goal, for the attainment of pleasure and power, utter these flowery words that talk of many special rituals that are capable of giving better births and various results of actions.

For those who pursue, pleasure and power exclusively, whose minds are robbed away by those flowery words, well ascertained understanding does not take place in their mind.

ये एवं विवेकबुद्धिरहिताः तेषां कामात्मनां यत्फलं तदाह -

**त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।**

**निर्द्वन्द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान्।। ४५।।**

वेदाः त्रैगुण्यविषयाः अर्जुन निस्त्रैगुण्यः भव। निर्द्वन्द्वः (भव) नित्यसत्वस्थः (भव)। निर्योगक्षेमः (भव)। आत्मवान् (भव)।। ४५

The subject matter of the Vedas is related to the three qualities. Oh! Arjuna, be one who is free from the three-fold qualities, from (the sorrow of) the pairs of opposites, one who is ever established in *sattva-guṇa*, one who is free from the anxieties of acquiring and protecting, one who is a master of oneself.

त्रैगुण्येति। त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदाः त्रैगुण्य-विषयाः। त्वं तु निस्त्रैगुण्यो भवार्जुन निष्कामो भवेत्यर्थः। निर्द्वन्द्वः सुख-दुःख-हेतू सप्रतिपक्षौ पदार्थौ द्वन्द्व-शब्द-वाच्यौ ततो निर्गतो निर्द्वन्द्वो भव। त्वं नित्यसत्त्वस्थः सदा सत्त्व-गुणाश्रितो भव। तथा निर्योगक्षेमः अनुपात्तस्योपादानं योगः, उपात्तस्य रक्षणं क्षेमः। योग-क्षेम-प्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव। आत्मवान् अप्रमत्तश्च भव। एष तवोपदेशः स्वधर्ममनुतिष्ठतः।। ४५ ।।

सर्वेषु वेदोक्तेषु कर्मसु यान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत् किमर्थं तानि ईश्वराय अनुष्ठीयन्ते

इति, उच्यते श्रृणु -

**यावानर्थ उदपाने सर्वतः संप्लुतोदके।**

**तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।। ४६**

यावान् अर्थः उदपाने (तावान्) सर्वतः संप्लुतोदके । (यावान् अर्थः) सर्वेषु वेदेषु तावान् (अर्थः) विजानतः ब्राह्मणस्य (भवति) ।। ४६

For the *brāhmaṇa* who knows the self, all the Vedas are of so much use as a small reservoir is when there is a flood everywhere.

यावानिति। यथा लोके कूप-तडागाद्यनेकस्मिन् उदपाने परिच्छिन्नोदके यावान् यावत् परिमाणः स्नान-पानादिः अर्थः फलं प्रयोजनं स सर्वोऽर्थः सर्वतः संप्लुदोदके तावान् एव सम्पद्यते, तत्रान्तर्भवतीत्यर्थः। एवं तावान् तावत् परिमाण एव सम्पद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत्कर्म-फलं सोऽर्थो ब्राह्मणस्य संन्यासिनः परमार्थ-तत्त्वं विजानतः योऽर्थो विज्ञान-फलं सर्वतः संप्लुदोदकस्थानीयं तस्मिन्

तावानेव सम्पद्यते। तत्रैवान्तर्भवतीत्यर्थः।

"यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति, यस्तद्वेद

यत्स वेद" इति श्रुतेः (छा. ४.१.४)।

"सर्वं कर्माखिलम्" (गी ४.३३) इति च वक्ष्यति।

तस्मात् प्राग्ज्ञाननिष्ठाधिकार-प्राप्तेः कर्मण्यधिकृतेन कूप-तडागाद्यर्थस्थानीयमपि कर्म कर्त्तव्यम्।। ४६

।।

तव च -

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

**मा कर्मफलहेतुर्भूः मा ते सङ्गोस्त्वकर्मणि।। ४७**

ते कर्मणि एव अधिकारः । कदाचन मा फलेषु । कर्मफलहेतुः मा भूः । ते अकर्मणि सङ्गः मा अस्तु । ४७

Your choice is in action only, never in the results thereof. Do not be the author of the results of action. Let your attachment not be to inaction.

कर्मणीति। कर्मण्येवाधिकारः न ज्ञान-निष्ठायां ते तव। तत्र च कर्म कुर्वतो मा फलेषु अधिकारोऽस्तु कर्म-फल-तृष्णा मा भूत् कदाचन कस्यांचिदप्यवस्थायामित्यर्थः। यदा कर्म-फले तृष्णा ते स्यात् तदा कर्म-फल-प्राप्तेर्हेतुः स्याः, एवं मा कर्मफलहेतुर्भूः। यदा हि कर्म-फल-तृष्णा-प्रयुक्तः कर्मणि प्रवर्त्तते तदा कर्म-फलस्यैव जन्मनो हेतुर्भवेत्। यदि कर्म-फलं नेष्यते किं कर्मणा दुःख-रूपेण इति मा ते तव सङ्गोऽस्त्वकर्मणि अकरणे प्रीतिर्मा भूत्।। ४७ ।।

यदि कर्मफलप्रयुक्तेन न कर्त्तव्यं कर्म कथं तर्हि कर्त्तव्यमिति उच्यते -

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**

**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।। ४८।।**

धनंजय सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समो भूत्वा योगस्थः (सन्) कर्माणि कुरु । समत्वं योगः उच्यते।। ४८

Remaining steadfast in *yoga*, Oh! Dhanañjaya, perform actions, abandoning attachment, remaining the same to success and failure alike. This evenness of mind is called *yoga*.

योगस्थ इति। योगस्थः सन् कुरु कर्माणि केवलम् ईश्वरार्थं, तत्रापि ईश्वरो मे तुष्यतु इति, सङ्गं त्यक्त्वा धनञ्जय।

फल-तृष्णा-शून्येन क्रियमाणे कर्मणि सत्त्व-शुद्धिजा ज्ञान-प्राप्ति-लक्षणा सिद्धिः तद्विपर्ययजाऽसिद्धिः तयोः सिद्ध्यसिद्ध्योः अपि समः तुल्यो भूत्वा कुरु कर्माणि। कोऽसौ योगो यत्रस्थः कुरु इत्युक्तम् इदमेव तत् - सिद्ध्यसिद्ध्योः समत्वं योग उच्यते।। ४८ ।।

यत्पुनः समत्व-बुद्धि-युक्तम् ईश्वराराधनार्थं कर्म, एतस्मात् कर्मणः -

**दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।**

**बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः।। ४९**

धनञ्जय बुद्धियोगाद् कर्म दूरेण अवरं हि । बुद्धौ शरणम् अन्विच्छ । फलहेतवः कृपणाः।। ४९

Action (based on desire) is therefore far inferior to that performed with the proper attitude of *karma-yoga*. Seek refuge in this *buddhi-yoga* (of proper attitude) Oh! Dhanañjaya. Those who perform action only for the results are misers.

दूरेणेति। दूरेण अतिविप्रकर्षेण ह्यवरं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात् समत्व-बुद्धि-युक्तात् कर्मणः, जन्म-मरणादि-हेतुत्वाद् धनञ्जय। यत एवं येग-विषयायां बुद्धौ तत्परिपाकजायां वा साङ्ख्य-बुद्धौ शरणम् आश्रयमभय-प्राप्ति-कारणम् अन्विच्छ प्रार्थयस्व। परमार्थ-ज्ञान-शरणो भव इत्यर्थः। यतोऽवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः फल-तृष्णा-प्रयुक्ताः सन्तः। "यो वा एतदक्षरं गार्ग्यविदित्वा अस्माल्लोकात् प्रैति स कृपणः" (बृ. ३.८.१०) इति श्रुतेः।। ४९ ।।

समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु -

**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**

**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।। ५०।।**

बुद्धियुक्तः (पुरुषः) इह उभे सुकृतदुष्कृते जहाति। तस्माद् योगाय युज्यस्व । कर्मसु कौशलम् योगः। ५०

One who is endowed with the *samatva-buddhi*, sameness of mind, gives up both *puṇya* and *pāpa* here, in this world. Therefore, commit yourself to *karma-yoga*. *karma-yoga* is discretion in action.

बुद्धीति। बुद्धियुक्तः समत्व-विषयया बुद्ध्या युक्तो बुद्धि-युक्तो जहाति परित्यजति इह अस्मिँल्लोके उभे सुकृतदुष्कृते पुण्य-पापे सत्त्व-शुद्धि-ज्ञान-प्राप्ति-द्वारेण यतः तस्मात् समत्व-बुद्धि-योगाय युज्यस्व घटस्व। योगः हि कर्मसु कौशलं स्वधर्माख्येषु कर्मसु वर्त्तमानस्य या सिद्ध्यसिद्ध्योः समत्व-बुद्धिरीश्वरार्पित-चेतस्तया तत्कोशलं कुशल-भावः। तद्धि कौशलं य□न्ध-स्वभावान्यपि कर्माणि समत्व-बुद्ध्या स्वभावात् निवर्त्तन्ते। तस्मात्समत्वबुद्धियुक्तो भव त्वम्।। ५०

यस्मात् -

**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।**

**जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्।। ५१**

बुद्धियुक्ताः (पुरुषाः) कर्मजं फलं त्यक्त्वा मनीषिणः (सन्तः) हि जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्ति (तस्माद्योगाय युज्यस्व इति पूर्वेण संबन्धः) ।। ५१

The wise, endowed with the attitude of *karma-yoga*, having given up the results of action, free from the bondage of birth, indeed accomplish the end that is free from all affliction.

कर्मजमिति। कर्मजं फलं त्यक्त्वा इति व्यवहितेन सम्बन्धः। इष्टानिष्ट-देह-प्राप्तिः कर्मजं फलं कर्मभ्यो जातम्। बुद्धियुक्ताः समत्व-बुद्धि-युक्ता हि तस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणः ज्ञानिनो भूत्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धो जन्म-बन्धः तेन विनिर्मुक्ता जीवन्त एव जन्म-बन्ध-विनिर्मुक्ताः सन्तः पदं परमं विष्णोर्मोक्षाख्यं गच्छन्ति अनामयम् सर्वोपद्रवरहितम् इत्यर्थः। अथवा "बुद्धियोगाद्धनञ्जय" (गी २.४९) इत्यारभ्य परमार्थ-दर्शन-लक्षणैव सर्वतः सम्प्लुदेदकस्थानीया कर्मयोगज-सत्वशुद्धिजनिता बुद्धिः दर्शिता साक्षात् सुकृतदुष्कृतप्रहाणादि-हेतुत्व-श्रवणात् ।। ५१ ।।

योगानुष्ठान-जनित-सत्त्व-शुद्धिजा बुद्धिः कदा प्राप्स्यते इत्युच्यते -

**यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।**

**तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च।।५२**

यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा श्रोतव्यस्य श्रुतस्य च निर्वेदं गन्ता असि ।। ५२

When your intellect crosses over the impurity of delusion, then you shall gain a dispassion towards what has been heard and what is yet to be heard.

यदेति। यदा यस्मिन् काले ते तव मोहकलिलं मोहात्मकमविवेक-रूपं कालुष्यं, येन आत्मानात्म-विवेक-बोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्त्तते तत्, तव बुद्धिः व्यतितरिष्यति व्यतिक्रमिष्यति, शुद्धि-भावमापत्स्यत इत्यर्थः।

तदा तस्मिन् काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च तदा श्रोतव्यं श्रुतं च निष्फलं प्रतिपद्यत इत्यभिप्रायः।। ५२

मोह-कलिलात्यय-द्वारेण लब्धात्म-विवेकज-प्रज्ञः कदा कर्मयोगजं फलं परमार्थ-योगम् अवाप्स्यसीति

चेत् तच्छृणु -

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।**

**समाधावचला बुद्धिः तदा योगमवाप्स्यसि।।५३**

यदा ते श्रुतिविप्रतिपन्ना बुद्धिः निश्चला स्थास्यति समाधौ अचला (स्थास्यति) तदा योगम् अवाप्स्यसि।। ५३

When your mind is no longer distracted by the Vedas (which present various means and ends to be gained) it will remain steady, firmly established in the self. Then you will gain self-knowledge.

श्रुतिविप्रतिपन्नेति। श्रुतिविप्रतिपन्ना अनेक-साध्य-साधन-सम्बन्ध-प्रकाशन-श्रुतिभिः श्रवणैः विप्रतिपन्ना

नाना-प्रतिपन्ना श्रुतिविप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिः यदा यस्मिन्काले स्थास्यति स्थिरी-भूता

भविष्यति निश्चला विक्षेप-चलन-वर्जिता सती समाधौ समाधीयते चित्तमस्मिन्निति समाधिरात्मा

तस्मिन् आत्मनीत्येतत्। अचला तत्रापि विकल्प-वर्जितेत्येतत्। बुद्धिः अन्तःकरणम्। तदा तस्मिन्

काले योगम् अवाप्स्यसि विवेक-प्रज्ञां समाधिं प्राप्स्यसि।। ५३

प्रश्न-बीजं प्रतिलभ्य अर्जुन उवाच लब्ध-समाधि-प्रज्ञस्य लक्षण-बुभुत्सया -

**अर्जुन उवाच**

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।**

**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्।। ५४।।**

केशव स्थितप्रज्ञस्य समाधिस्थस्य का भाषा । स्थितधीः किं प्रभाषेत किमासीत किम् व्रजेत ।। ५४

Arjuna said:

Oh! Keśava, what is the description of a person of firm wisdom, one whose mind abides in the *ātman*, self? How does such a person, whose mind is not shaken by anything, speak, sit, and walk?

स्थितप्रज्ञस्येति। स्थिता प्रतिष्ठिता अहमस्मि परं ब्रह्म इति प्रज्ञा यस्य स स्थितप्रज्ञः तस्य का भाषा किं भाषणं वचनम् कथमसौ परैर्भाष्यते समाधिस्थस्य समाधौ स्थितस्य केशव। स्थितधीः स्थित-प्रज्ञः स्वयं वा किं प्रभाषेत किमासीत व्रजेत किम् आसनं व्रजनं वा तस्य कथमित्यर्थः। स्थित-प्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छति।। ५४ ।।

यो हि आदितः एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तः यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य

“प्रजहाति” इत्यारभ्य अध्यायपरिसमाप्तिपर्यन्तं स्थितप्रज्ञलक्षणं साधनं च उपदिश्यते। सर्वत्र एव हि

अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात्। यानि यत्नसाध्यानि

साधनानि लक्षणानि (च) भवन्ति तानि -

**श्रीभगवानुवाच**

**प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।**

**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।। ५५**

पार्थ आत्मनि एव आत्मना तुष्टः (सन्) यदा (पुरुषः) मनोगतान् सर्वान् कामान् प्रजहाति तदा स्थितप्रज्ञः उच्यते।। ५५

Śrī Bhagavān said:

When a person gives up all the desires as they appear in the mind, Oh! Pārtha, happy in oneself, with oneself alone, that person is said to be one of ascertained knowledge.

प्रजहातीति। प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन् काले सर्वान् समस्तान् कामान् इच्छा-

भेदान् हे पार्थ मनोगतान् मनसि प्रविष्टान् हृदि प्रविष्टान्।

सर्व-काम-परित्यागे तुष्टि-कारणाभावाच्छरीर-धारण-निमित्त-शेषे च सति, उन्मत्त-प्रमत्तस्य इव प्रवृत्तिः

प्राप्ता इत्यत उच्यते - आत्मन्येव प्रत्यगात्म-स्वरूप एव आत्मना स्वेनैव बाह्य-लाभ-निरपेक्षः तुष्टः

परमार्थ-दर्शनामृतरसलाभेनान्यस्मात् अलंप्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मानात्म-

विवेकजा प्रज्ञा यस्य स स्थित-प्रज्ञो विद्वान् तदोच्यते।

त्यक्त-पुत्र-वित्त-लोकैषणः संन्यास्यात्माराम आत्मक्रीडः स्थित-प्रज्ञ इत्यर्थः।। ५५ ।।

किञ्च -

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**

**वीतरागभयक्रोधः स्थितधीः मुनिरुच्यते।। ५६**

दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः मुनिः स्थितधीः उच्यते।। ५६

The one who is not, affected by adversities, who is without yearning for pleasures, and is free from longing, fear, and anger is said to be a wise person whose knowledge remains.

दुःखेष्विति। दुःखेषु आध्यात्मिकादिषु प्राप्तेषु, नोद्विग्नं न प्रक्षुभितं दुःख-प्राप्तौ मनो यस्य सोऽयम् अनुद्विग्नमनाः। तथा सुखेषु प्राप्तेषु, विगता स्पृहा तृष्णा यस्य नाग्निः इव इन्धनाद्याधाने सुखान्यनु विवर्धन्ते स विगतस्पृहः।

वीतरागभयक्रोधः रागश्च भयं च क्रोधश्च वीता विगता यस्मात् स वीतरागभयक्रोधः स्थितधीः स्थित-प्रज्ञो मुनिः संन्यासी तदा उच्यते।। ५६ ।।

किञ्च -

**यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम्।**

**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।५७**

यः सर्वत्र अनभिस्नेहः तत् तत् शुभाशुभम् प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठा।। ५७

For the one who is unattached in all situations, who does neither rejoices on gaining the pleasant and nor hates the unpleasant, his knowledge is well-established.

यः सर्वत्रेति। यः मुनिः सर्वत्र देहजीवितादिष्वपि अनभिस्नेहः अभिस्नेह-वर्जितः तत्तत्प्राप्य शुभाशुभं

तत्तच्छुभम् अशुभं वा लब्ध्वा।

नाभिनन्दति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यति, अशुभं च प्राप्य न द्वेष्टीत्यर्थः।

तस्य एवं हर्षविषाद-वर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति।। ५७

किञ्च -

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**

**इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता।। ५८।।**

यदा अयं कूर्मः अङ्गानि इव इन्द्रियार्थेभ्यः इन्द्रियाणि सर्वशः संहरते च तस्य प्रज्ञा प्रतिष्ठिता।। ५८

And when, like the turtle that withdraws its limbs, this person is able to completely withdraw the sense organs from their objects, his knowledge is steady.

यदा संहरत इति। यदा संहरते सम्यगुपसंहरते चायं ज्ञान-निष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव सर्वशः

यथा कूर्मो भयात् स्वान्यङ्गान्युपसंहरते सर्वतः, एवं ज्ञान-निष्ठः इन्द्रियाणीन्द्रियार्थेभ्यः सर्व-विषयेभ्य

उपसंहरते।

तस्य प्रज्ञा प्रतिष्ठिता इत्युक्तार्थं वाक्यम्।। ५८ ।।

तत्र विषयाननाहरतः आतुरस्यापि इन्द्रियाणि **निवर्त्तन्ते**, कूर्माङ्गानि इव संह्रियन्ते न तु तद्विषयः रागः,

स कथं संह्रियते इति। उच्यते -

**विषया विनिवर्त्तन्ते निराहारस्य देहिनः।**

**रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते।। ५९।।**

निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्त्तन्ते (विषयेभ्यः)। अस्य रसः अपि परं दृष्ट्वा निवर्त्तते।। ५९

For one who does not feed the senses, the senses come back to oneself, leaving the longing behind. Having seen Brahman (when the self is known) even the longing goes away.

विषया इति। यद्यपि विषयोपलक्षितानि विषय-शब्द-वाच्यानीन्द्रियाणि।

अथवा विषया एव।

निराहारस्य अनाह्रियमाण-विषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्त्तन्ते देहिनः देहवतः।

रसवर्जं रसो रागो विषयेषु यस्तं वर्जयित्वा।

रस-शब्दो रागे प्रसिद्धः स्वरसेन प्रवृत्तो रसिको रसज्ञः इत्यादि-दर्शनात्।

सः अपि रसः रञ्जन-रूपः सूक्ष्मः अस्य यतेः परं परमार्थ-तत्त्वं ब्रह्म दृष्ट्वा उपलभ्य अहमेव तत् इति

वर्त्तमानस्य निवर्त्तते।

निर्बीजं विषय-विज्ञानं सम्पद्यत इत्यर्थः।

नासति सम्यग्दर्शने रसस्य उच्छेदः।

तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्त्तव्यम् इत्यभिप्रायः।। ५९ ।।

संयग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदौ इन्द्रियाणि स्ववशे स्थापयितव्यानि यस्मात् तदनवस्थापने

दोषमाह -

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**

**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।। ६०**

कौन्तेय विपश्चितः यततः हि पुरुषस्य अपि प्रमाथीनि इन्द्रियाणि प्रसभं मनः हरन्ति ।। ६०

Because, the powerful senses of even the person who makes effort, who sees clearly, forcefully take the mind away, Oh! Arjuna.

यतत इति। यततः प्रयत्नं कुर्वतः अपि हि यस्मात् कौन्तेय पुरुषस्य विपश्चितः मेधाविनो अपि इति

व्यवहितेन सम्बन्धः।

इन्द्रियाणि प्रमाथीनि प्रमथन-शीलानि विषयाभिमुखं हि पुरुषं विक्षोभयन्त्याकुली कुर्वन्ति।

आकुलीकृत्य च हरन्ति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेक-विज्ञान-युक्तं मनः।। ६० ।।

यतः तस्मात् -

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः।**

**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।।६१**

तानि सर्वाणि संयम्य मत्परः युक्तः आसीत । यस्य हि इन्द्रियाणि वशे (वर्त्तन्ते) तस्य प्रज्ञा प्रतिष्ठिता।। ६१

May one who is endowed with discrimination, keeping all the sense organs in one's own hands, sit in contemplation of Me. For the one who has all the sense organs under control, the knowledge is well-established.

तानीति। तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन् आसीत मत्परः अहं

वासुदेवः सर्व-प्रत्यगात्मा परो यस्य स मत्परः नान्योऽहं तस्मात् इत्यासीतेत्यर्थः।

एवमासीनस्य यतेः वशे हि यस्येन्द्रियाणि वर्तन्तेऽभ्यास-बलात् तस्य प्रज्ञा प्रतिष्ठिता।। ६१ ।।

अथ इदानीं पराभविष्यतः सर्वानर्थमूलं इदमुच्यते -

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।**

**सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते।। ६२।।**

ध्यायत इति। ध्यायतः चिन्तयतः विषयान् शब्दादीन् विषय-विशेषानालोचयतः पुंसः पुरुषस्य सङ्गः आसक्तिः प्रीतिः तेषु विषयेषु उपजायते।

सङ्गात् प्रीतेः सञ्जायते समुत्पद्यते कामः तृष्णा। कामात् कुतश्चित्प्रतिहतात् क्रोधोऽभिजायते।। ६२ ।।

**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।**

**स्मृतिभ्रंशाद्बुद्धिनाशः बुद्धिनाशात्प्रणश्यति।।६३**

क्रोधादिति। क्रोधाद्भवति संमोहः अविवेकः कार्याकार्य-विषयः।

क्रुद्धो हि सम्मूढः सन् गुरुम् अप्याक्रोशति।

संमोहात्स्मृतिविभ्रमः शास्त्राचार्योपदेश- आहित-संस्कार-जनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः

स्मृत्युत्पत्ति-निमित्त-प्राप्तावनुत्पत्तिः।

ततः स्मृतिभ्रंशाद् बुद्धेर्नाशः। कार्याकार्य-विषय-विवेक-अयोग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते।

बुद्धिनाशात् प्रणश्यति।

तावदेव हि पुरुषो यावदन्तःकरणं तदीयं कार्याकार्य-विषय-विवेक-योग्यम्।

तदयोग्यत्वे नष्ट एव पुरुषो भवति।

अतः तस्यान्तःकरणस्य बुद्धेर्नाशात् प्रणश्यति। पुरुषार्थायोग्यो भवतीत्यर्थः।। ६३ ।।

विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते। सङ्गात् कामः संजायते । कामात् क्रोधः अभिजायते। क्रोधाद् संमोहः भवति । संमोहात् स्मृतिविभ्रमः (भवति)। स्मृतिभ्रंशाद्बुद्धिनाशः (भवति) बुद्धिनाशात् प्रणश्यति।।६२, ६३

In the person who dwells upon objects, an attachment is born with reference to them. From attachment is born desire and from desire, anger is born. From anger comes delusion and from delusion comes the loss of memory. Because of the loss of memory, the mind becomes incapacitated and when the mind is incapacitated, the person is destroyed.

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम्। अथेदानीं मोक्षकारणमिदमुच्यते -

**रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।**

**आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति।। ६४**

रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः तु विषयान् चरन् विधेयात्मा प्रसादम् अधिगच्छति।। ६४

Whereas, one whose mind is controlled, moving in the world of objects with the sense organs under his or her control, free from likes and dislikes, attains tranquillity.

रागद्वेषेति। रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ।

तत्पुरःसरा हि इन्द्रियाणां प्रवृत्तिः स्वाभाविकी। तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिः इन्द्रियैः विषयान् अवर्जनीयान् चरन् उपलभमानः आत्मवश्यैः आत्मनो वश्यानि वशीभूतानि तैरात्मवश्यैः विधेयात्मा इच्छातो विधेयः आत्माऽन्तःकरणं यस्य सोऽयं प्रसादम् अधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यम्।। ६४ ।।

प्रसादे सति किं स्यादित्युच्यते -

**प्रसादे सर्वदुःखानां हानिरस्योपजायते।**

**प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते।। ६५।।**

प्रसादे अस्य सर्वदुःखानां हानिः उपजायते। हि प्रसन्नचेतसः बुद्धिः आशु पर्यवतिष्ठते।। ६५

When the mind is tranquil, destruction of all pain and sorrow happens because the knowledge of one who is tranquil-minded soon becomes well established.

प्रसाद इति। प्रसादे सर्वदुःखानाम् आध्यात्मिकादीनां हानिः विनाशः अस्य यतेः उपजायते।

किञ्च प्रसन्नचेतसः स्वस्थान्तःकरणस्य हि यस्माद् आशु शीघ्रं बुद्धिः पर्यवतिष्ठते आकाशमिव परि

समन्तादवतिष्ठते। आत्म-स्वरूपेणैव निश्चलीभवतीत्यर्थः।

एवं प्रसन्न-चेतसोऽवस्थितबुद्धेः कृत-कृत्यता यतस्तस्माद् रागद्वेष-वियुक्तैरिन्द्रियैः

शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः।। ६५ ।।

सेयं प्रसन्नता स्तूयते -

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**

**न चाभावयतश्शान्तिः अशान्तस्य कुतस्सुखम्।। ६६।।**

अयुक्तस्य बुद्धिः नास्ति । अयुक्तस्य न च भावना। अभावयतः न च शान्तिः । अशान्तस्य कुतः सुखम्।। ६६

For the one who is not tranquil, there is no knowledge. For the one who is not tranquil, there is no contemplation and for the one who is not contemplative, there is no peace. For the one who has no peace, how can there be happiness?

नास्तीति। नास्ति न विद्यते, न भवतीत्यर्थः। बुद्धिः आत्म-स्वरूप-विषया अयुक्तस्य असमाहितान्तः-करणस्य। न च अस्ति अयुक्तस्य भावना आत्म-ज्ञानाभिनिवेशः। तथा न च अस्ति अभावयतः आत्म-ज्ञानाभिनिवेशमकुर्वतः शान्तिः उपशमः। अशान्तस्य कुतः सुखम् इन्द्रियाणां हि विषय-सेवा-तृष्णातो निवृत्तिर्या तत् सुखम्। न विषय-विषया तृष्णा। दुःखमेव हि सा। न तृष्णायां सत्यां सुखस्य गन्ध-मात्रमप्युपपद्यते इत्यर्थः।। ६६ ।।

अयुक्तस्य कस्माद् बुद्धिः नास्ति इत्युच्यते -

**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।**

**तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि।। ६७।।**

यत् मनः चरताम् इन्द्रियाणां हि अनुविधीयते वायुः अम्भसि नवम् इव तद् अस्य प्रज्ञां हरति ।। ६७

The mind that follows the moving senses indeed robs the person of his knowledge, just as the wind carries away a small boat on the waters.

इन्द्रियाणामिति। इन्द्रियाणां हि यस्मात् चरतां स्व-स्व-विषयेषु प्रवर्त्तमानानां यन्मनः अनुविधीयते अनुप्रवर्त्तते तद् इन्द्रिय-विषय-विकल्पने प्रवृत्तं मनः अस्य यतेः हरति प्रज्ञाम् आत्मानात्म-विवेकजां नाशयति। कथम् वायुर्नावमिवाम्भसि उदके जिगमिषतां मार्गाद् उद्धृत्योन्मार्गे यथा वायुर्नावं प्रवर्त्तयति, एवम् आत्म-विषयां प्रज्ञां हृत्वा मनो विषय-विषयां करोति।। ६७

"यततो ह्यपि" इत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वा, तं चार्थमुपपाद्य, उपसंहरति -

**तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।**

**इन्द्रियाणि इन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता।। ६८ ।।**

तस्माद् महाबाहो यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता।। ६८

Therefore, Oh! Mighty armed Arjuna, the knowledge of one whose senses are completely withdrawn (mastered) from their respective objects is steady.

तस्मादिति। इन्द्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात् तस्माद् यस्य यतेर्हे महाबाहो निगृहीतानि सर्वशः सर्वप्रकारैर्मानसादि-भेदैः इन्द्रियाणि इन्द्रियार्थेभ्यः शब्दादिभ्यः तस्य प्रज्ञा प्रतिष्ठिता।। ६८ ।।

योऽयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वात्

अविद्यानिवृत्तौ निवर्त्तते अविद्यायाः च विद्याविरोधाद् निवृत्तिः इत्येतमर्थं स्फुटीकुर्वन्नाह -

**या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी।**

**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।। ६९।।**

या सर्वभूतानां निशा तस्यां संयमी जागर्त्ति । सा पश्यतो मुनेः निशा यस्यां भूतानि जाग्रति ।। ६९

In that which is night for all beings, the one who is wise, who has mastery over oneself, is awake. That, in which beings are awake, is night for the wise one who sees.

या निशेति। या निशा रात्रिः सर्व-पदार्थानामविवेक-करी तमःस्वभावत्वात्, सर्वेषां भूतानां

सर्वभूतानाम् । किं तत् परमार्थ-तत्त्वं स्थित-प्रज्ञस्य विषयः।

यथा नक्तञ्चराणां अहरेव सद् अन्येषां निशा भवति तद्वन्नक्तञ्चर-स्थानीयानामज्ञानां सर्व-भूतानां निशेव

निशा परमार्थ-तत्त्वम्, अगोचरत्वादतद्बुद्धीनाम्।

तस्यां परमार्थ-तत्त्व-लक्षणायामज्ञान-निद्रायाः प्रबुद्धो जागर्त्ति संयमी संयमवान् जितेन्द्रियो योगीत्यर्थः।

यस्यां ग्राह्य-ग्राहक-भेद-लक्षणायाम् अविद्या-निद्रायां प्रसुप्तान्येव भूतानि जाग्रति इत्युच्यते, यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः सा निशा अविद्या-रूपत्वात्, परमार्थ-तत्त्वं पश्यतो मुनेः।।

अतः कर्माण्यविद्यावस्थायामेव चोद्यन्ते न विद्यावस्थायाम्। विद्यायां हि सत्यामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छत्यविद्या।

प्राग्विद्योत्पत्तेरविद्या प्रमाण-बुद्ध्या गृह्यमाणा क्रिया-कारक-फल-भेद-रूपा सती सर्व-कर्म-हेतुत्वं प्रतिपद्यते। नाप्रमाण-बुद्ध्या गृह्यमाणायाः कर्म-हेतुत्वोपपत्तिः।

प्रमाण-भूतेन वेदेन मम चोदितं कर्त्तव्यं कर्म इति हि कर्मणि कर्त्ता प्रवर्त्तते।

न अविद्या-मात्रमिदं सर्वं निशेव इति। यस्य पुनः निशा इव अविद्या-मात्रमिदं सर्वं भेदजातम् इति

ज्ञानं तस्य आत्मज्ञस्य सर्व-कर्म-संन्यास एवाधिकारः, न प्रवृत्तौ।

तथा च दर्शयिष्यति “तद्बुद्धयस्तदात्मानः” (गी ५.१७) इत्यादिना ज्ञान-निष्ठायामेव तस्याधिकारम्।।

तत्रापि प्रवर्त्तक-प्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेत्।

न। स्वात्म-विषयत्वादात्म-ज्ञानस्य।

न ह्यात्मनः स्वात्मनि प्रवर्त्तक-प्रमाणापेक्षताऽऽत्मत्वादेव, तदन्तत्वाच्च सर्व-प्रमाणानां प्रमाणत्वस्य।

न ह्यात्म-स्वरूपाधिगमे सति पुनः प्रमाण-प्रमेय-व्यवहारः सम्भवति।

प्रमातृत्वं ह्यात्मनो निवर्त्तयत्यन्त्यं प्रमाणम्। निवर्त्तयदेव चाप्रमाणी भवति, स्वप्न-काल-प्रमाणमिव प्रबोधे। लोके च वस्त्वधिगमे प्रवृत्ति-हेतुत्वादर्शनात् प्रमाणस्य।

तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धम्।। ६९ ।।

विदुषः त्यक्तैषणस्य स्थित-प्रज्ञस्य यतेरेव मोक्षप्राप्तिः, न त्वसंन्यासिनः कामकामिन इत्येतमर्थं

दृष्टान्तेन प्रतिपादयिष्यन्नाह -

**आपूर्यमाणमचलप्रतिष्ठम् समुद्रमापः प्रविशन्ति यद्वत्।**

**तद्वत्कामाः यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।। ७०।।**

आपूर्यमाणम् अचलप्रतिष्ठम् समुद्रम् यद्वत् आपः प्रविशन्ति तद्वत् यं सर्वे कामाः प्रविशन्ति सः शान्तिम् आप्नोति। कामकामी (शान्तिम्) न (आप्नोति) ।। ७०

Just as water flows into the ocean that is brimful and still, so too, the wise person into whom all objects enter, gains peace, (remains unchanged); whereas, the desirer of objects does not gain peace.

आपूर्येति। आपूर्यमाणम् अद्भिः अचलप्रतिष्ठम् अचलतया प्रतिष्ठाऽवस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रम्

आपः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत् तद्वत्कामाः विषय-सन्निधावपि सर्वत

इच्छा-विशेषा यं पुरुषं समुद्रमिवापोऽविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते न स्वात्म-वशं

कुर्वन्ति स शान्तिं मोक्षं आप्नोति न इतरः कामकामी काम्यन्त इति कामा विषयास्तान् कामयितुं

शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः।। ७० ।।

यस्मादेवं तस्मात् -

**विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**

**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।।७१**

यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः चरति सः शान्तिम् अधिगच्छति।। ७१

Having given up all binding desires, the person who moves around, devoid of longing, without the sense of limited 'I' and 'mine,' gains peace.

विहायेति। विहाय परित्यज्य कामान् यः संन्यासी पुमान् सर्वान् अशेषतः कार्त्स्न्येन चरति जीवन-मात्र-चेष्टा-शेषः पर्यटतीत्यर्थः। निःस्पृहः शरीर-जीवन-मात्रेऽपि निर्गता स्पृहा यस्य स निःस्पृहः सन् निर्ममः शरीर-जीवन-मात्राक्षिप्त-परिग्रहेऽपि ममेदम् इति अभिनिवेश-वर्जितः निरहङ्कारः विद्यावत्त्वादि-निमित्तात्म-सम्भावना-रहित इत्यर्थः। स एवंभूतः स्थित-प्रज्ञो ब्रह्मवित् शान्तिं सर्व-संसार-दुःखोपरम-लक्षणां निर्वाणाख्याम् अधिगच्छति प्राप्नोति। ब्रह्मभूतो भवतीत्यर्थः।। ७१ ।।

सैषा ज्ञाननिष्ठा स्तूयते -

**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।**

**स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति।। ७२ ।।**

पार्थ एषा ब्राह्मी स्थितिः । एनां प्राप्य न विमुह्यति। अन्तकाले अपि अस्याम् स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति।। ७२

This is what is meant by being steady in Brahman, Oh! Pārtha. Having gained this, one is not deluded. Remaining therein, even at the end of one's life, one gains liberation.

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो

नाम द्वितीयोऽध्यायः।।

Thus ends the second chapter called *Sāṅkhyayoga* — The chapter of Knowledge — in the *Bhagavadgītā* which is in the form of a dialogue between Śrī Kṛṣṇa and Arjuna, which is the essence of the *Upaniṣads*, whose subject matter is both the knowledge of Brahman and *Yoga*.

एषा ब्राह्मीति। एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः सर्वं कर्म संन्यस्य ब्रह्म-रूपेणैव

अवस्थानमित्येतत्।

हे पार्थ न एनां स्थितिं प्राप्य लब्ध्वा विमुह्यति मोहं न प्राप्नोति।

स्थित्वा अस्यां स्थितौ ब्राह्म्यां यथोक्तायां अन्तकालेऽपि अन्ते वयस्यपि ब्रह्मनिर्वाणं ब्रह्म-निर्वृतिं

मोक्षम् ऋृच्छति गच्छति।

किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति।।७२ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ

श्रीमद्भगवद्गीताभाष्ये द्वितीयोऽध्यायः।।